Downloaded from https:// www.studiestoday.com

केरळपाठावलिः

संस्कृतम्

नवमी कक्ष्या

अक्कादमिक-संस्कृतविद्यालयानां कृते

भागः 2 $\frac{2}{2}$

KERALA READER SANSKRIT

STANDARD

9

For Academic and Sanskrit Schools

PART - 2 $\frac{2}{2}$

NT-897-1-SANSKRIT-9-A/S-VOL.2

Government of Kerala
Department of General Education

State Council of Educational Research and Training (SCERT), Kerala
2019

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

राष्ट्रगीतम्

जनगण मन अधिनायक जय हे
भारत भाग्यविधाता।
पंजाब सिन्ध गुजरात मराठा
द्राविड उत्कल बंगा।
विन्ध्य हिमाचल यमुना गंगा
उच्छलजलधि तरंगा।
तव शुभ नामे जागे
तव शुभ आशिष मागे
गाहे तव जय-गाथा।
जनगण मंगलदायक जय हे
भारत भाग्यविधाता
जय हे जय हे जय हे
जय जय जय जय हे।

प्रतिज्ञा

भारतं मम राष्ट्रम्। सर्वे भारतीयाः मे भ्रातरः। अहं मम राष्ट्रे स्निह्यामि। तस्य समृद्धायां नानाविधायां च पूर्विकसम्पत्तौ अभिमानी च भवामि। तद्योग्यतां सम्पादयितुं सदा यतिष्ये च।अहं पितरौ गुरूंश्चादरिष्ये, बहुमानयिष्ये च। विनयान्वित एवाहं सदा सर्वैः सह व्यवहरिष्ये, सर्वेषु प्राणिषु दयालुर्वर्तिष्ये च। मम राष्ट्राय राष्ट्रियेभ्यश्चाहं समर्पये स्वसेवाम्। राष्ट्रियाणां योगक्षेमैश्वर्येष्वेवाहम् आत्मनस्तोषं कलयामि।

State Council of Educational Research and Training (SCERT)
Poojappura, Thiruvananthapuram 695012, Kerala
Website: www.scertkerala.gov.in
email: scertkerala@gmail.com
Phone:0471-2341883, fax;0471-231869
Typesetting and Layout: SCERT
Printed at : KBPS, Kakkanad, Kochi-30
Department of General Education, Government of Kerala

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

भूमिका

प्रिय छात्राः!

परिष्कृता अस्माकं पाठ्यपद्धतिः प्रवर्तनाधिष्ठिता छात्रकेन्द्रीकृता च भवति। छात्राणां सर्वतोमुखविकासः एव अस्याः पद्धतेः लक्ष्यम्। तदनुसारमेव पाठ्यक्रमः स्वीकृतः। पाठ्यक्रमे पाठपुस्तकस्य अद्वितीयं स्थानमस्ति। स्वयं पठनाय सङ्घपठनाय भाषानैपुणीनां विकासाय च पाठपुस्तकमुपकरोति।

अष्टमकक्ष्याया अनुस्यूततया एवास्य पुस्तकस्य रचना प्रवृत्ता। विविधानां व्यवहाररूपाणां परिचायनाय पुस्तकेऽस्मिन् पठनसन्दर्भाः आयोजिताः। पठितानामाशयानां द्रढीकरणाय नूतनसन्दर्भेषु प्रयोगाय स्वयं मूल्यनिर्णयाय चावकाशः यथायोग्यं दत्तानि।

पाठपुस्तकस्यास्य द्वितीयभागे एककद्वयम् अस्ति।। विषयानुसारमेव एककस्य नाम। प्रत्येकम् एककस्य प्रारम्भे आमुखम्, प्रवेशकप्रवर्तनं च दत्तमस्ति। पाठस्यान्ते प्रवर्तनानि अधिकपठनांशाः चाक्रिकारोहणप्रक्रिया च दत्तानि। पाठभागे अधिकसूचनार्थं केचन भागाः प्रत्येकं पङ्क्तिषु दत्ताः। एष भागः अधिकांशस्वीकाराय एव न तु मूल्यनिर्णयाय। एककानामन्ते शब्दकोशः पृथक् दत्तः। पाठभागेष्वागतानां व्याकरणांशानां विवरणं यथास्थानं दत्तमस्ति।

राष्ट्रिय-कर्मनैपुणीपद्धतिं (NSQF) यदृच्छया समागच्छन्तीं दुर्घटनां निवारयितुं समर्थानि, जीवननैपुणीसंवर्धकानि प्रवर्तनानि तथा समग्रशिक्षा द्वारिकायाः कृते सूचना संवेदन तान्त्रिक- (ICT) साध्यताश्च परिगणय्य समुष्टीकृतं वर्तते इदं पाठपुस्तकम्।

भाषापठनमनायासं सुखप्रदं च कर्तुं पाठपुस्तकमिदं पर्याप्तमिति चिन्तयामि। संस्कृतपठनं सर्वदा मधुरं सफलं च भवतु इति आशासे।

डा.जे.प्रसाद्
निदेशकः
राज्यशैक्षिकानुसन्धानप्रशिक्षणपरिषद्, केरळम्।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

राज्यशैक्षिकानुसन्धानप्रशिक्षणपरिषद्, केरलाः
STATE COUNCIL OF EDUCATIONAL RESEARCH AND TRAINING, KERALA

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

भागः 2

विषयानुक्रमणिका

एककम्			पाठस्य नाम	व्यवहाररूपम्	पुटसंख्या
III	सञ्जीवनी	६	श्लाघ्यं कलापैतृकम्।	(विवरणम्- ई लेखः)	७९
		७	संरक्षितोऽहं त्वया।	(पटकथा)	८७
IV	चिन्तामणिः	८	शास्त्रं विज्ञानपूर्तये।	(विवरणम्)	१०२
		९	आत्मबोधो विमुक्तये	(जीवनचरितम्)	११०
		१०	वंशानुचरितम्	(चरित्रकाव्यम्)	११९

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

पुस्तकसंरक्षणम्

'तैलाद्रक्ष जलाद्रक्ष रक्ष मां श्लथबन्धनात्।
परहस्तगताद्रक्ष'- नित्यं रोदिति पुस्तकम्।।

संस्कृतभाषा

भाषासु मधुरा रम्या हृद्या गीर्वाणभारती।

विद्यायाः महत्वम्

सर्वेषां शोभमानानां शोभनतमा विद्या।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

एककम् ३

सञ्जीवनी



आमुखम्

काव्यास्वादने सहृदयानां सञ्जीवनौषधं भवति दृश्यकाव्यम्। भिन्नरुचेः जनस्य समाराधकं दृश्यं भवति नाट्यम्। अतः सञ्जीवनी नामके अस्मिन्नेकके कूटियाट्टमधिकृत्य ई लेखरूपं **श्लाघ्यं कलापैतृकम्** इति , मृच्छकटिकप्रकरणमाधारीकृत्य **संरक्षितोऽहं त्वया** इति पटकथा च अन्तर्भवतः।

प्रवेशकः - **केरलीयकलारूपाण्यधिकृत्य चर्चित्वा कक्ष्यायाम् अवतारयतु।**

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

पाठः ६

श्लाघ्यं कलापैतृकम्

संस्कृतोत्सवे 'कूटियाट्टम्' प्रतियोगितायां पुरस्कृता बालिका तद्विषये विशेषज्ञानार्जनाय कूटियाट्टाचार्येभ्यो 'इ लेख'द्वारा (E-mail) सन्देशं प्रेषयति।



कूटियाट्टमधिकृत्य विशदीकरणम् पृष्ट्वा।

koodiyattamkeralam@gmail.com

कूटियाट्टमधिकृत्य विशदीकरणम् पृष्ट्वा।

कूटियाट्टकलारूपस्याभिनयेन अस्य महिमानमौन्नत्यं च अवगन्तुमवसरो लब्धः। अत एव तत् कलारूपं यथाशास्त्रं पठितुमिच्छाम्यहम्। तदर्थं भवतः साहाय्यं प्रार्थये। मम 'ई लेखं' प्रति विवरणं सदयं प्रेषयन्तु भवन्तः।

सविनयम्

सविता।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



प्रियवत्से !

भवत्याः ई लेखः पठितः। कूटियाट्टपठने औत्सुक्यं ज्ञात्वा नितरां तुष्यामि। शुभाशंसामर्पये। अधुना लोके परिलसत् संस्कृतदृश्यकलारूपं भवति कूटियाट्टम्। एतत् केरलीयसंस्कृतरूपकाभिनयः भवति। कूटियाट्टम् इति मलयालपदस्य सन्ति बहूनि निर्वचनानि। एतेषु प्रायेण मिलित्वा नटनम् इति व्याख्यानमेव स्वीक्रियते। वाद्य - सङ्गीत - नृत्त - अभिनयानां समन्वय एवास्य विशेषता। आङ्गिक - सात्विक - वाचिक - आहार्यरूपाः चतुर्विधाभिनयाः अस्मिन् प्रयुज्यन्ते। अस्य पौराणिकतां साहित्यसम्पुष्टतां च निरीक्ष्य युनेस्को संस्थया २००६ तमे वर्षे विश्वपैतृककलारूपेण समादृतमिदं कलारूपम्।

यद्यपि कूत्तम्बलेष्वेव अस्य रङ्गाविष्कारः प्रवृत्त आसीत् तथाप्यधुना विख्यातेषु सदस्सु पण्डितसभासु चास्य प्रयोगः संलक्ष्यते। भास-बोधायन-महेन्द्रविक्रम-श्रीहर्ष-शक्तिभद्र-कुलशेखर-नीलकण्ठप्रभृतिभिः विरचितानि रूपकाण्येव कथावस्तुरूपेण स्वीकृतानि।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com


KOODIYATTAM Re: कूटि

https://mail.google.com/mail/u/0/#inbox/FMfcgxvzKQjLRxZbDzKbtTBmBKQZXWhW?compose=Dmw

कूटियाट्टमधिकृत्य विशदीकरणम् पृष्ट्वा।

koodiyattamkeralam@gmail.com

कूटियाट्टमधिकृत्य विशदीकरणम् पृष्ट्वा।

पूर्वरङ्गक्रिया, सूत्रधारप्रवेशः, कथापात्रप्रवेशः, निर्वहणम्, सरूपकावतारणम्, भरतवाक्यम्, मुटियक्कित्ता इत्येवमभिनयक्रमाः अस्मिन् विद्यन्ते। मिष़ाव् , इटक्का , कुषि़त्तालं , शङ्खः, कुरुङ्कुष़ल् इत्यादीनि वाद्योपकरणानि अप्युपयुज्यन्ते।

केरलकलामण्डले तथा केन्द्रीयसंङ्गीतनाटकअक्कादमीद्वारा अङ्गीकृतेषु अष्टसु केन्द्रेषु च कूटियाट्टपठनाय अवसराः वर्तन्ते। एतदधिकृत्य सविशदं विवरणं लब्धुं www.sanskrit kerala.gov.in गूगिल् , विक्किपीडिया, समग्रा आदयः साहायकाः भवन्ति। ।पुनरपि भवत्याः जिज्ञासाभरितं लेखं प्रतीक्ष्य

सस्नेहम्

चाक्यारः।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

पदच्छेदः

अत एव	अतः +एव ।
अप्युपयुज्यन्ते	अपि +उपयुज्यन्ते।
अवसरो लब्धः	अवसरः + लब्धः।
इत्येव	इति + एव ।
एवास्याः	एव + अस्याः।
कूत्तम्बलेष्वेव	कूत्तम्बलेषु + एव।
चास्य	च + अस्य।
तथाप्यधुना	तथापि + अधुना ।
पठितुमिच्छाम्यहम्	पठितुम् + इच्छामि +अहम्।
पुनरपि	पुनः + अपि।
रूपाण्येव	रूपाणि+ एव।
समन्वय एव	समन्वयः + एव।

विग्रहः

औन्नत्यम्	उन्नतेः भावः।
औत्सुक्यम्	उत्सुकस्य भावः।
जिज्ञासाभरितं	ज्ञातुम् इच्छा जिज्ञासा,तया भरितम्।
यथाशास्त्रम्	शास्त्रम् अनतिक्रम्य।
सविनयम्	विनयेन सह वर्तते यस्मिन् कर्मणि।

धातुपरिचयः

प्रेषयति	-	प्र + एष्	-	परस्मैपदि लट् प्र पु ए.व (णिच्)
तुष्यामि	-	तुष्	-	प प - लट् उ पु - ए व
प्रयुज्यन्ते	-	प्र + युज्	-	आ प -लट् प्र पु -ब व (कर्मणि)
संलक्ष्यते	-	सम् + लक्ष्	-	आ प -लट् प्र पु -ए व (कर्मणि)
विद्यन्ते	-	विद्	-	आ प -लट् प्र पु -ब व
वर्तन्ते	-	वृतु	-	आ प -लट् प्र पु -ब व

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

पठनप्रवर्तनानि।

कञ्चन कूटियाट्टकलाकारं समेत्य अभिभाषणं कृत्वा कूटियाट्टमधिकृत्य लघुविवरणं करोतु।

श्रद्धेयांशौ

आशयव्यक्तता।

समग्रता।

अनुबन्धे दत्तं कीलफलकं दृष्ट्वा संस्कृतलिपिविन्यासं परिचिनोतु , स्वनाम्नि ई-लेखसङ्केतमपि निर्मातु।

कूटियाट्टमधिकृत्य अधिकविस्तराय koodiyattam keralam@gmail.com इति सङ्केतं प्रति ई लेखं प्रेषयतु। कूटियाट्टस्य चित्राणि समाहृत्य एकं चित्रपुटं निर्मातु।

श्रद्धेयांशाः

वैचित्र्यम्।

आकर्षणीयता।

औचित्यम्।

कमपि विषयमधिकृत्य ई-लेखसङ्केतमुपयुज्य मित्रं प्रति लेखमेकं लिखतु।

श्रद्धेयांशाः

लेखस्य घटना।

समग्रता।

विषयानुबन्धिता।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

अधिकविस्तरः ।

अभिनयक्रमः ।

पूर्वरङ्गक्रिया	-	कूटियाट्टं पूर्वरङ्गेणैव आरभते। रङ्गसज्जीकरणानन्तरं रङ्गशुद्धीकरणम् । कैरल्याम् अरङ्ङुतलि (അരങ്ങുതളി) इत्युच्यते।
सूत्रधारप्रवेशः	-	तत्र सूत्रधारः त्रिवर्तिकं दीपं प्रज्वाल्य नान्दीश्लोकं पठति। जलगन्धपुष्पैः आराध्य ब्रह्मदेवमभिवाद्य रङ्गम् अभिवन्द्य च नेपथ्यं प्रविशति।
कथापात्रप्रवेशः	-	कथापात्राणि यवनिकां गृहीत्वा वेदिकायाः वामभागतः प्रविशति।
निर्वहणम्	-	कथासङ्ग्रहस्य परिचायनम्। (पूर्वकथायाः श्लोकरूपेणावतारणम्)
रूपकावतारणम्	-	कथापात्राणामभिनयः।
भरतवाक्यम्	-	संस्कृतरूपकाणामन्ते आयोजितम् आशीश्श्लोकः भवति भरतवाक्यम्।
मुटियक्कित्ता	-	कूटियाट्टम् एकं यज्ञमिति विभाव्य यज्ञेषु कृतसदृशं सर्ववस्तुसमर्पणं भवति मुटियक्कित्ता।

क्रियारूपपरिचयः ।

प्रेषयिष्यामि - प्र पूर्वक एष् गत्यर्थे णिचि परस्मैपदि लृट् लकारः।

लटि रूपाणि	**एकवचनम्**	**द्विवचनम्**	**बहुवचनम् ।**
प्र.पु	प्रेषयति	प्रेषयतः	प्रेषयन्ति
म.पु	प्रेषयसि	प्रेषयथः	प्रेषयथ
उ.पु	प्रेषयामि	प्रेषयावः	प्रेषयामः।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

कूटियाट्टे उपयुज्यमानाः ग्रन्थाः		
भासनाटकचक्रम्	भासः	क्रि.प द्वितीयशतकम्
भगवदज्जुकम्	बोधायनः	क्रि.प द्वितीयशतकम्
मत्तविलासप्रहसनम्	महेन्द्रविक्रमः	क्रि.प सप्तमशतकम्
नागानन्दम्	श्रीहर्षः	क्रि.प सप्तमशतकम्
आश्चर्यचूडामणिः	शक्तिभद्रः	क्रि.प अष्टमशतकम्
तपतीसंवरणम्	कुलशेखरः	क्रि.प त्रयोदशशतकम्
सुभद्राधनञ्जयम्	कुलशेखरः	क्रि.प त्रयोदशशतकम्
कल्याणसौगन्धिकम्	नीलकण्ठः	क्रि.प त्रयोदशशतकम्

संस्कृतकीलफलकम्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

पाठः ७

संरक्षितोऽहं त्वया

पटकथा

(मृच्छकटिकाख्यस्य प्रकरणस्य आविष्कारः)

दृश्यश्रव्यभेदेन काव्यं द्विविधम्। दर्शनेनास्वदनीयं दृश्यप्रभेदं भवति दृश्यकाव्यम्। तस्यैव रूपकमिति नामान्तरमस्ति। दशविधानि रूपकाणि सन्ति। इतिवृत्तं नायकः रसः इत्येतानि आश्रित्यैव रूपकाणां भेदः परिकल्पितः। तेष्वन्यतमं भवति प्रकरणम्। अश्वघोष-भास- कालिदास- दिङ्नाग- शूद्रक-श्रीहर्ष- विशाखदत्त- भट्टनारायण-भवभूति - शक्तिभद्रादयो विख्याताः नाटककारा एव। एषु शूद्रकेण विरचितं प्रकरणं भवति मृच्छकटिकम्।

दशरूपकाणि

नाटकमथ प्रकरणं भाणव्यायोगसमवकारडिमाः।
ईहामृगाङ्कवीथ्यः प्रहसनमिति रूपकाणि दश।।

(साहित्यदर्पणे षष्ठपरिच्छेदः)

प्रकरणं

भवेत् प्रकरणे वृत्तं लौकिकं कविकल्पितम्।
शृङ्गारोऽङ्गी नायकस्तु विप्रोऽमात्योऽथवा वणिक्।।
सापायधर्मकामार्थपरो धीरप्रशान्तकः।
नायिका कुलजा क्वापि वेश्या क्वापि द्वयं क्वचित्।।

(साहित्यदर्पणे षष्ठपरिच्छेदः)

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



पटकथा

उज्जयिन्याः वणिक् चारुदत्तः अतिदानेन दरिद्रः संवृत्तः। तस्य जीवनचरितमेव मृच्छकटिकम् इति प्रकरणस्य प्रतिपाद्यम्। दशभिः अङ्कैः ग्रथितस्य अस्य आर्यकापहरणम् इति सप्तमाङ्कात् स्वीकृतः कश्चिदंश एवात्र पटकथारूपेण अवतार्यते।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

दृश्यम् १

(प्रभातम्। पुष्पकरण्डकं नाम जीर्णोद्यानम्। उद्यानं सर्वतः कुसुमिताः वृक्षाःसन्ति। कुसुमात् कुसुमं मधुपाः प्रविचरन्ति। उज्जयिन्याः वणिक् चारुदत्तः सखा मैत्रेयो नाम विदूषकश्च उद्यानं प्रविशति। चारुदत्तः आरामशोभया व्यामुग्ध इति तस्य प्रसन्नतया सुव्यक्तमेव। तत्र

कुत्रचित् असंस्काररमणीये शिलातले विदूषकः प्रथमम् उपविशति। ततः उपवेशनाय चारुदत्तं प्रेरयति च।)

विदूषकः - **मनोहरमिदं शिलातलम्। उपविशतु भवान्।**

(चारुदत्तः उपविशति। कस्यापि आगमनं प्रतीक्ष्य वर्तते सः। तस्य मुखमाकुलं दृश्यते। वर्धमानकस्य आगमने विलम्ब एव तस्याकुलतायाः कारणम्। सः विदूषकं पृच्छति)

चारुदत्तः - वयस्य, मैत्रेय! एतावत्पर्यन्तं वर्धमानकः न आगतः किल?

पदच्छेदः

विदूषकश्च - विदूषकः + च ।

कुर्वन्नस्ति - कुर्वन् + अस्ति ।

पदार्थः

वणिक् - क्रयविक्रयकर्ता।

असंस्काररमणीये - निसर्गसुन्दरे।

व्यामुग्धः - आकृष्टचित्तः।

वयस्यः - वयसा तुल्यः । प्राणिनां कालकृतावस्थाविशेषो वयः।

विग्रहः

जीर्णोद्यानम् - जीर्णं च तदुद्यानं च।

मधुपाः - मधु पिबन्ति इति मधुपाः।

वणिक् - पणते क्रयविक्रयादिना व्यवहरतीति वणिक्।

NT-897-2-SANSKRIT-9-A/S-VOL.2

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

विदूषकः - वसन्तसेनां गृहीत्वा अवधानतया आगन्तव्यम् इत्युक्तम्।

चारुदत्तः - पुनः विलम्बस्य हेतुः कः स्यात्?

(अस्वस्थः चारुदत्तः उत्थाय उद्यानद्वारं गच्छति। चिन्तामग्नः सः शिलातलं प्रत्यागच्छति। एवमाकुलतया गमनागमनं कुर्वन्नस्ति ।)

दृश्यम् २

(मध्याह्नः। शीतलच्छायापूर्णे उद्याने आतपस्य पीडा तावन्नास्ति। खिन्नमानसः चारुदत्तः नम्रशिरस्कः उपविशति। विरहितोऽयं कोकिलानां कूजनेन अस्वस्थः लक्ष्यते। उद्यानस्य

प्रवेशद्वारस्य विदूरं दृश्यम्। वृषभशकटस्य घण्टानादः आराच्छ्रूयते। शकटम् उद्यानस्य प्रवेशद्वारमागत्य तिष्ठति। शकटस्य समीपदृश्यम्। चालको वर्धमानकः यानादवतीर्य विदूषकसमीपं गच्छति। तस्मै यानमागतमिति निवेदयति। विदूषकः चारुदत्तमुपेत्य प्रियं निवेदयति।)

पदच्छेदः

इत्युक्तम् - इति + उक्तम् ।

तावन्नास्ति। - तावत् + न+अस्ति।

विरहितोऽयम् - विरहितः + अयम्।

आराच्छ्रूयते। - आरात् + श्रूयते।

पदार्थः

अवधानतया - श्रद्धया।

जवनिका - आच्छादनवस्त्रम्।

विग्रहः

जवनिका - जूयते आच्छाद्यते अनया इति जवनिका।

खिन्नमानसः - खिन्नं मानसं यस्य सः।

नम्रशिरस्कः - नम्रं शिरः यस्य सः।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

विदूषकः - भो! सम्प्राप्ता वसन्तसेना।

(वार्तां श्रुत्वा सन्तुष्टः चारुदत्तः मुखम् उन्नीय सामोदं विदूषकं पश्यति।)

चारुदत्तः - प्रियं नः प्रियम्। (सः वसन्तसेनामानय इति मैत्रेयं निर्दिशति।)

चारुदत्तः - सखे! मैत्रेय! अवतारय वसन्तसेनाम्।

दृश्यम् ३

(यानस्य पार्श्वदृश्यम्। तस्य पश्चाद्भागः जवनिकया आच्छादितः अस्ति। मैत्रेयः यानसमीपं गच्छति। यानाद्बहिः निगडबद्धौ पादौ जानुमात्रं दृश्येते। सः यानास्तरणम् ईषदपसारयति। तत्र वसन्तसेनायाः स्थाने पुरुषमेकं पश्यति। चरणबद्धं दृष्ट्वा मैत्रेयः भीतः जायते। सः चारुदत्तमेवमुच्चैर्वदति।)

मैत्रेयः - नासौ वसन्तसेना , असौ वसन्तसेनः।

(वसन्तसेनादर्शनोत्सुकः चारुदत्तः तम् एवं वदति।)

पदार्थः

यानास्तरणम्	- यानपरिस्तोमः।
ईषद्	- अल्पम् ।
जानुमात्रं	- जानु प्रमाणम्।
अपसारयति	- अनावृणोति।
निगडः	- लोहमयबन्धनोपकरणम्।

विग्रहः

सामोदं	- आमोदेन सह वर्तत इति।
निगडः	- निगलति बध्नाति इति निगडः।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

चारुदत्तः - अलं परिहासेन। न कालमपेक्षते स्नेहः । अथवा स्वयमेव अवतारयामि।

(चारुदत्तः वसन्तसेनाम् अवतारयितुं वाहनम् उपगच्छति। सः आस्तरणमपसार्य यानमधिरोहति।)

दृश्यम् ४

(यानस्यान्तर्भागः। भीतः आर्यकः । चारुदत्तः निगडबद्धम् आर्यकं पश्यति। सोऽपि तत्र उपविश्य पृच्छति।)

चारुदत्तः - को भवान्?

पुरुषः - शरणागतो गोपालको आर्यकोऽस्मि।

(आर्यकशब्दश्रवणेन चारुदत्तः चिन्ताग्रस्तः भवति।)

चारुदत्तः - राज्ञा पालकेन कारागारे बद्धः आर्यको वा?

आर्यकः - आम्।

चारुदत्तः - विधिना एव भवान् मम पुरतः आगतः।
मम प्राणापायेऽपि शरणागतं त्वां न त्यजामि।

(आर्यकः दीर्घं निश्वसिति। आर्यकस्य चरणाभ्यां निगडापनयनाय चारुदत्तः वर्धमानकं निर्दिशति।)

चारुदत्तः - वर्धमानक! चरणान्निगडमपनय।

वर्धमानकः - अपनीतानि निगडानि।(सः तथा करोति।)

(बन्धनान्मुक्तः सन्तुष्टः आर्यकः चारुदत्तं प्रणम्य एवं वदति।)

आशयः

न कालमपेक्षते स्नेहः- इष्टजनस्य दर्शनाय प्रणयिनः कालविलम्बं न सहन्ते। इति।

पदच्छेदः

सोऽपि - सः + अपि।
को भवान् - कः + भवान् ।
आर्यकोऽस्मि - आर्यकः + अस्मि।
प्राणापायेऽपि - प्राणापाये + अपि।
चरणान्निगडमपनय - चरणात्+निगडम्+अपनय।

पदार्थः

प्राणापायेऽपि - मरणे अपि।
कारागारे - बन्धनगृहे।
अपनय - निवारय।

विग्रहः

शरणागतः - शरणम् आगतः/ शरणाय आगतः
चिन्ताग्रस्तः - चिन्तया ग्रस्तः
कारागारे - कारायै बन्धनाय आगारम्,तस्मिन्

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

आर्यकः - स्नेहमयान्यन्यानि दृढतराणि दत्तानि।

(तयोर्वार्तालापं शृण्वन् मैत्रेयः परिहासरूपेण चारुदत्तं वदति।)

मैत्रेयः - संगच्छ निगडानि। एषोऽपि मुक्तः। साम्प्रतं वयं व्रजिष्यामः।

(यानस्य अन्तर्भागः। चारुदत्तार्यकौ वार्तालापं कुरुतः। आर्यकः ततः गमनोत्सुकः भवति।)

आर्यकः - श्रीमन्! इतः गन्तुमनुज्ञा दीयताम्।

(चारुदत्तः दक्षिणहस्तेन मार्गं निर्दिश्य वदति)

चारुदत्तः - गम्यताम्।

आर्यकः - तर्हि अवतरामि।

(आर्यकः यानादवतरितुं यतते। किन्तु चारुदत्तः तं निवारयति।)

चारुदत्तः - सखे, नावतरितव्यम्। कारागृहात् पलायितस्य भवतः बहिर्गमनं न युज्यते। रक्षिपुरुषाः सर्वत्र अटन्त्यधुना। अतः अनेन यानेनैव गम्यताम्। मम शकटमिदं विश्वासपात्रं भवति तेषाम्।

आर्यकः - तथास्तु।

(चारुदत्तः शकटादवतरति। शाकटिकः शकटमारोहति।)

चारुदत्तः - नायं देशः सुरक्षितः। अतः शीघ्रं गच्छतु भवान्।

(अञ्जलीबद्धः आर्यकः चारुदत्तं यात्रानुमतिं पृच्छति। तौ वचनप्रतिवचनरूपेण एवं वदति।)

आशयः

स्नेहमयान्यन्यानि दृढतराणि दत्तानि।

इदानीम् आर्यकः लोहमयबन्धनान्मुक्तः। किन्तु ततोऽपि बलवता स्नेहपाशेन बद्धः इति तात्पर्यार्थः।

पदच्छेदः

बहिर्गमनम् - बहिः + गमनम्।

अटन्त्यधुना - अटन्ति + अधुना।

पदार्थः

संगच्छ	-	धारय।
साम्प्रतं	-	इदानीम्
व्रजिष्यामः	-	गमिष्यामः
अटन्ति	-	भ्रमणं कुर्वन्ति
रक्षिपुरुषाः	-	राजपुरुषाः/भटाः

विग्रहः

साम्प्रतम्- सम्प्रति भवम्।

शाकटिकः- शकटेन गच्छति इति ।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

क्षेमेण व्रज बान्धवान् ननु मया लब्धो भवान् बान्धवः
स्मर्तव्योऽस्मि कथान्तरेषु भवता स्वात्मापि विस्मर्यते।
त्वां रक्षन्तु पथि प्रयान्तममराः संरक्षितोऽहं त्वया
स्वैर्भाग्यैः परिरक्षितोऽसि ननु हे तत्रापि हेतुर्भवान्।।

आर्यकः - पुनर्मिलावः।

चारुदत्तः - तथास्तु।

(इति निष्क्रान्तः)

आशयः

संगच्छ निगडानि। एषोऽपि मुक्तः। साम्प्रतं वयं व्रजिष्यामः।

आर्यकस्य बन्धनाय उपयुक्तां शृङ्खलां स्वीकरोतु भो। एषः आर्यकः बन्धनात् मोचितः किल। इदानीं वयं कारागारं गमिष्यामः इत्यर्थः। नियमसंहितानुसारम् अपराधिनः संरक्षणमपि अपराध एव। अत्र अपराधिने आर्यकाय चारुदत्तः शरणं ददाति चेत् तदपि अपराधः भविष्यति। तदर्थं कारागृहं गन्तव्यं भवेदित्याशयः (एषः आर्यकः शृङ्खलाबन्धनात् मुक्तिं प्राप्तः। इदानीं वयं सर्वे आत्मरक्षणाय इतः गमिष्याम इति भावः)

अन्वयः	अन्वयार्थः
बान्धवान्	बन्धुजनान्
क्षेमेण व्रज	कुशलेन गच्छ
ननु मया	निश्चयेन (आर्यकेण)
भवान्	त्वम् (चारुदत्तः)
बान्धवः	बन्धुः
लब्धः	प्राप्तः
भवता	त्वया (आर्यकेण)
कथान्तरेषु	उचितसन्दर्भेषु
अहम्	अहम् (मां इति यावत्)
स्मर्तव्यः:अस्मि	स्मरणीयो भवामि।
स्वात्मापि	आत्मानमपि
विस्मर्यते।	विस्मरणीयो भवति
प्रयान्तम्	गच्छन्तं
त्वाम्	भवन्तम्
अमराः	देवाः
पथि	अध्वनि (मार्गे इत्यर्थः)
रक्षन्तु ।	परिपालयन्तु ।
त्वया	चारुदत्तेन
अहम्	आर्यकः
संरक्षितः	परित्रातः
त्वं स्वैः भाग्यैः	स्वीयैः पुण्यैः
परिरक्षितः असि।	परित्रातः असि।
ननु हे	निश्चयेन हे महात्मन्!
तत्रापि भवान्	आर्यकरक्षणे चारुदत्त
हेतुः।	एव कारणम्।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

पठनप्रवर्तनानि।

पटकथांशं भावानुसारं पठतु।

श्रद्धेयाः अंशाः

आशयावगमः।

पदच्छेदः।

पदार्थज्ञानम्।

पटकथांशं पठित्वा कथारूपेण सङ्क्षिप्य लिखतु।

श्रद्धेयाः अंशाः

आशयसंग्रहः।

उचितपदस्वीकारः।

भाषाशुद्धिः।

कथाशैली।

अधोदत्तानाम् अव्ययानां पट्टिकां कृत्वा कानिचित् उपयुज्य वाक्यानि रचयन्तु।

श्रद्धेयाः अंशाः

अव्ययज्ञानम्।

पट्टिकाकरणसामर्थ्यम्।

भाषाप्रयोगः।

गत्वा	गृहीत्वा	दृष्ट्वा	उत्थाय	अपनेतुम्	अलम्
इति	इदानीं	किन्तु	किल	तथा	तत्र
च	तर्हि	तावत्	पुनः	वा	शीघ्रं
ईषद्	अवतरितुम्	सह	अपि	एवं	नूनम्

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

क्त्वान्तम्	ल्यबन्तम्	तुमुन्नन्तम्	अन्यानि अव्ययानि

ग्रन्थानां ग्रन्थकर्तृणां च यथोचितं पट्टिकां कुरुत।

कालिदासः	मुद्राराक्षसम्
भवभूतिः	ऊरुभङ्गः
शूद्रकः	उत्तररामचरितम्
भासः	मृच्छकटिकम्
शक्तिभद्रः	विक्रमोर्वशीयम्
अश्वघोषः	आश्चर्यचूडामणिः
विशाखदत्तः	शारीपुत्रप्रकरणम्

ग्रन्थः	ग्रन्थकर्ता

चर्चा

पुनः विलम्बस्य हेतुः कः स्यात्?

चारुदत्तस्य इमं प्रस्तावमाधारीकृत्य वर्धमानकस्य विलम्बे हेतूनि चर्चित्वा लिखत।

श्रद्धेयौ अंशौ

आशयसंग्रहः।

भाषाप्रयोगः।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

क्षेमेण व्रज ..... इति श्लोकं पठित्वा आर्यकचारुदत्तयोः सम्भाषणं लिखत।

चारुदत्तस्य स्वभावमधिकृत्य चर्चां कृत्वा लघुटिप्पणीं लिखतु।

श्रद्धेयाः अंशाः

आशयसंग्रहः।

उचितपदस्वीकारः।

भाषाशुद्धिः।

पटकथांशं सम्यक् पठित्वा सम्बोधनरूपाणि चित्वा लिखतु।

श्रद्धेयौ अंशौः

सम्बोधनपरिचयः

चयनसामर्थ्यम्।

अधिकविस्तरः

नाटककारः	जीवनकालः	कृतयः
अश्वघोषः	क्रि.प० प्रथम०	शारीपुत्रप्रकरणम्
भासः	क्रि.प० द्वितीय०	चारुदत्तादि १३ नाटकानि
कालिदासः	क्रि.प० पञ्चम०	अभिज्ञनशाकुन्तलादि नाटकत्रयम्
दिङ्नागः	क्रि.प० पञ्चम०	कुन्दमाला
शूद्रकः	क्रि.प० षष्ठ०	मृच्छकटिकम्
श्रीहर्षः	क्रि.प० सप्तम०	नागानन्दम्,रत्नावली,प्रियदर्शिका नाटकम्
विशाखदत्तः	क्रि.प० सप्तम०	मुद्राराक्षसम्
भट्टनारायणः	क्रि.प० सप्तम०	वेणीसंहारः
भवभूतिः	क्रि.प० अष्टम०	उत्तररामचरितम्, मालतीमाधवम्, महावीरचरितम्
शक्तिभद्रः	क्रि.प० अष्टम०	आश्चर्यचूडामणिः

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

कोशः

आस्तरणम्	- प्रवेण्यास्तरणं वर्णः परिस्तोमः कुथो द्वयोः	(अम० २-९-४२)
उद्यानम्	- स्यादुद्यानं निस्सरणे वनभेदे प्रयोजने।	(अम० ३-१६-११७)
निगडः	- शृङ्खला पुंस्कटीकाञ्च्यां लोहरज्जौ च बन्धने।	(हैम०)
पीडा	- पीडाऽद्धबाधा वेदना दुःखम्।	(हलायुधकोशः)
मधुपः	- मधुव्रतो मधुकरो मधुलिण्मधुपालिनः।	(अम०२-६-३१)
यानम्	- स्याद्वाहनं यानं युग्यं पत्रं च धोरणम्।	(अम०२–९-५८)
वणिक्	- वैदेहकः सार्थवाहो नैगमो वणिजो वणिक्।	(अम०२-१०-७८)
सखा	- मित्रं सखा सुहृत्।	(अम०२-९-१२)

प्रयोगविशेषः

उद्यानं सर्वतः	- अभितः परितः उभयतः सर्वतः इत्यादीनां योगे द्वितीयाविभक्तिः।
अलं परिहासेन	- निषेधार्थकस्य अलम् इत्यस्य योगे तृतीयाविभक्तिः।
यानाद्बहिः	- बहिः शब्दयोगे पञ्चमीत्यनेन यानात् इति पञ्चमीविभक्तिः।

वृत्तपरिचयः

शार्दूलविक्रीडितम्। - सूर्याश्वैर्मसजस्तताः सगुरवः शार्दूलविक्रीडितम्।

(वृत्तरत्नाकरः/१०१)

शब्दकोशः

संस्कृतम्	संस्कृतम्	कैरली	कन्नटम्	आङ्गलेयम्
अलं	पर्याप्तम्	മതി	ಸಾಕು	Enough
असंस्कार-रमणीयः	प्रकृत्या मनोहरः	പ്രകൃത്യാമനോഹരമായത്	ಮನೋಹರ-ವಾದ	Naturally beautiful

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

आरात्	दूरे	ദൂരെ	ದೂರ	Far
ईषद्	अल्पमात्रम्	അല്പം	ಸ್ವಲ್ಪ	A bit of
उद्यानम्	आरामः	പൂന്തോട്ടം	ಹೂತೋಟ	Garden
औन्नत्यम्	महिमानं	മഹിമ	ಮಹಿಮೆ	Greatness
कारागृहम्	बन्धनगृहम्	തടവറ	ಕಾರಾಗೃಹ	Prison
चरणः	पादः	കാൽപാദം	ಪಾದ	Foot
जवनिका	यवनिका	തിരശ്ശീല	ಯವನಿಕೆ	Curtain
निगडः	शृङ्खला	ചങ്ങല	ಸಂಕೋಲೆ	Tether
नितराम्	अत्यन्तम्	അത്യന്തം	ಅತ್ಯಂತ	Highly/Too much
परिलसत्	शोभमानम्	ശോഭിക്കുന്ന	ಶೋಭಿಸುವ	Shining
पैतृककला	पारम्पर्यकला	പൈതൃകകല	ಪೈತೃಕಕಲೆ	Heritage art
प्रणम्य	नमस्कृत्य	നമസ്കരിച്ചിട്ട്	ನಮಸ್ಕರಿಸಿ	Having bowed
प्रायेण	बहुशः	മിക്കവാറും	ಹೆಚ್ಚಾಗಿಯೂ	Almost
मधुपः	भृङ्गः	വണ്ട്	ಭ್ರಮರ	Beetle
यथाशास्त्रम्	शास्त्रानुसारं	ശാസ്ത്രവിധി-യനുസരിച്ച്	ಶಾಸ್ತ್ರಕ್ಕೆ ಅನುಸಾರವಾಗಿ	As per Science
रक्षिपुरुषः	राजपुरुषः	പോലീസ്	ಆರಕ್ಷಕ	Police
वणिक्	क्रयविक्रेता	വ്യാപാരി	ವ್ಯಾಪಾರಿ	Merchant
व्यामुग्धः	आकृष्टः	ആകർഷിക്കപ്പെട്ടവൻ	ಆಕರ್ಷಿಸಲ್ಪಟ್ಟ	Being attracted
शकटम्	यानम्	വാഹനം	ವಾಹನ	Vehicle
सामोदम्	ससन्तोषम्	സന്തോഷത്തോടെ	ಸಂತೋಷದಿಂದ	With Pleasure

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

अभ्यासपत्रिका -३

१. खण्डिकां पठित्वा प्रश्नानामुत्तराणि लिखत।

उत्तरकेरलेषु प्रचारमाप्तं कलारूपं भवति पूरक्कलिः। इदं कलारूपं मीनमासे कृत्तिका-नक्षत्रात् आरभ्य पूर्वफाल्गुनिका (पूरम्) नक्षत्रपर्यन्तं मन्दिरेषु प्रचलति। कामदेवस्य पुनर्जननसंकल्पेन अयमुत्सवः आधुष्यते। कायिकी बौद्धिकी च क्रीडा भवतीयम्। तयोः बौद्धिकी क्रीडा भवति मरत्तुकलिः। पूरम् नक्षत्रे भगवत्याः स्नानात् परम् अस्य उत्सवस्य (पूरं कुलि इति कैरल्याम्) समापनं भवति।

क) पूरक्कलिः कस्मिन् मासे आचरति ?
ख) कस्य देवस्य पुनर्जननसंकल्पेन अयमाधुष्यते?
ग) बौद्धिकी क्रीडा का?
घ) भगवतीस्नानं केन नाम्ना व्यवह्रियते?
ङ) खण्डिकातः ल्यबन्तमव्ययरूपं चित्वा लिखत।

२. प्रादेशिकभाषया लिखत।

दशरूपकेषु अन्यतमं भवति प्रकरणम्। तेषु प्रसिद्धं प्रकरणद्वयं भवति मृच्छकटिकम् मालतीमाधवम् च। मृच्छकटिकस्य कर्ता शूद्रकः तथा मालतीमाधवस्य भवभूतिः च। इतिवृत्तस्य वैशिष्ट्येन मृच्छकटिकं सहृदयानां हृदयावर्जकं भवति । अस्मिन् नायकः भवति चारुदत्तः।

३ कूटियाट्टम् इति कलारूपस्य वैशिष्ट्यमधिकृत्य सूचनानुसारं लघूपन्यासं लिखत।

सूचनाः -

- संस्कृतरूपकस्य दृश्याविष्कारः।
- प्राचीनं कलारूपम्।
- युनेस्को सभायाः अङ्गीकारः।
- केरलेषु प्रचलति।

४ नाटकम् , महाकाव्यम् इति विविच्य पट्टिकां करोतु।

स्वप्नवासवदत्तम् , रघुवंशम्, किरातार्जुनीयम्, अभिज्ञानशाकुन्तलम्, प्रतिमानाटकम्, कुमारसम्भवम्, कर्णभारम्, शिशुपालवधम्, उत्तररामचरितम्, मृच्छकटिकम्, आश्चर्यचूडामणिः

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

५ **यथोचितं योजयत।**

कथाकेलिः	-	नङ्यारः ।
कूटियाट्टम्	-	कन्नटसाहित्यम् ।
ओट्टन्तुल्लल्	-	आट्टक्कथासाहित्यम् ।
चाक्यार्कूत्त्	-	संस्कृतनाटकसाहित्यम् ।
यक्षगानम्	-	शीतङ्कन् ।

६ **सूचनानुसारं चारुदत्तस्य कथापात्रस्वभावं निरूपयत।**

सूचना - दानकर्मणा दरिद्रः - वणिक् - परोपकारतत्परः - वसन्तसेना - आर्यकः - शरणागतरक्षणम् - उत्तमसौहृदम्।

किमधिगतम्

निर्देशः - प्रवर्तनानि यथाकालं कृतानि चेत् साधुसूचकचिह्नं (√) क्रियताम्

क्रम संख्या	प्रवर्तनानि	सम्यक् कृतम्	भागिकतया कृतम्	क्लेशनिर्देशः	परिहारबोधनम् (संख्यया सूचितम्)
१					
२					
३					
४					
५					
६					

१ अध्यापकस्य साहाय्येन । २ सुहृदः साहाय्येन। ३ अन्येषां साहाय्येन।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

एककम्
४

चिन्तामणिः

आमुखम्

चिन्तायाः विकासाय शास्त्रपठनं मननञ्चापेक्षितं भवति। निरुक्तादिशास्त्रं, महतां जीवनचरितं, चरित्रकाव्यपठनं च चिन्तोद्दीपनाय उपकारकं भवति। चिन्तामणि नामकेऽस्मिन्नेकके **शास्त्रं विज्ञानपूर्तये** इति विवरणम् **आत्मबोधो विमुक्तये** इति जीवनचरितं **वंशानुचरितम्** इति चरित्रकाव्यं चान्तर्भवति।

प्रवेशकः - **भारतीयशात्रपैतृकमधिकृत्य चर्चां करोतु।**

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

पाठः ८

शास्त्रं विज्ञानपूर्तये



सङ्गीतचित्रलेखनादिकलाविद्याम् आयुर्वेदगणितादिकं शास्त्रं चाधिकृत्य विशिष्य यत् ज्ञानमस्ति तत् विज्ञानम् इति कथ्यते। अमरकोशकारस्तु "विज्ञानं शिल्पशास्त्रयोः धीः" इति विज्ञानपदं निर्वक्ति। सङ्गीतम्, नाट्यम्, व्याकरणम्, गणितम्, ज्योतिषम्, निरुक्तम्, वास्तु, आयुर्वेदः, अलङ्कारः इत्यादिभिः विविधविज्ञानशाखाभिः सम्पन्ना इयं संस्कृतभाषा। संस्कृतकाव्यनाटकादीनाम् अनुशीलनेन विविधशास्त्रशाखानां समान्यपरिचयोऽपि प्रायेण सिद्ध्यति। तथापि विज्ञानपूर्तये शास्त्रानुशीलनमपि अवश्यं कर्तव्यम्। अतः शास्त्रत्रयस्य दिङ्मात्रनिरूपणमत्र क्रियते।

वेदाङ्गानि षट्।
शिक्षा कल्पो व्याकरणं
निरुक्तं ज्योतिषां गणः।
छन्दोविचितिरित्येतैः
षडङ्गो वेद उच्यते।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

वेदाङ्गानि

छन्दः पादौ तु वेदस्य
हस्तौ कल्पोऽथ पठ्यते।
ज्योतिषामयनं चक्षुः
निरुक्तं श्रोत्रमुच्यते।।
शिक्षा घ्राणं तु वेदस्य
मुखं व्याकरणं स्मृतम्।
तस्मात् साङ्गमधीत्यैव
ब्रह्मलोके महीयते।।

निरुक्तभेदाः

वर्णागमो वर्णविपर्ययश्च
द्वौ चापरौ वर्णविकारनाशौ।
धातोस्तदर्थातिशयेन योगः
तदुच्यते पञ्चविधं निरुक्तम्।।

हृदयपदनिरुक्तिः।

हृ -इत्येकमक्षरम् अभिहरति..,
द- इत्येकमक्षरं ददाति..,
य- इत्येकमक्षरं एति...।
(शतपथब्राह्मणम् १४-८-४-१)
अशुद्धरक्तस्य अपहरणम्, शुद्धरक्तस्य प्रदानम्, सर्वत्र तस्य यापनम् इत्येदतस्ति हृदयस्य धर्म इति अनेन निर्वचनेन व्यनक्ति आचार्यः।

निरुक्तम्

षट्सु वेदाङ्गेषु अन्यतमं भवति निरुक्तम्। यस्मिन् शास्त्रे पदानाम् अर्थाः निरुच्यन्ते -निश्शेषेण उच्यन्ते- तन्निरुक्तशास्त्रं भवति। पदानाम् अवयवार्थनिर्वचनमेव निरुक्तशास्त्रस्य मुख्यो विषयः। ब्राह्मणेषु एतादृश्याः अर्थकल्पनायाः प्राग्रूपं दृश्यते। किन्तु मूर्तरूपेण प्रथमतया रचितः निरुक्तग्रन्थः यास्कप्रणीत एव। यास्काचार्यः क्रिस्तोः पूर्वम् अष्टमे शतके ग्रन्थमिमं व्यरचयदिति केषाञ्चन विदुषामभिप्रायः। वैदिकशब्दानाम् अर्थनिर्णयः एव यास्कनिरुक्तस्य प्रतिपाद्यः। निघण्डुः इति प्रख्यातस्य वैदिकशब्दकोशस्य व्याख्यानरूपेण ग्रन्थोऽयं विरचितः। ग्रन्थेऽस्मिन् यथावसरं निर्वचनविधिं च समग्रतया विवृणोत्याचार्यः। नैघण्डुककाण्डः, नैगमकाण्डः, दैवताकाण्डः इति त्रयो भागाः अत्र वर्तन्ते।

वर्णागमः, वर्णविपर्ययः, वर्णविकारः, वर्णनाशः, धातोः अर्थयोगः चेति निरुक्तं पञ्चविधं भवति। अर्थप्राधान्यं पुरस्कृत्य निर्वचनं कर्तव्यमिति निरुक्तकारस्याभिमतः। यथा-

आचार्यः -आचारं ग्राहयति। अथवा आचारम् उपदिशति।

आतपत्रम् -आतपात् त्रायते ।

वस्त्रम् - वपुः त्रायते इति वपुस्त्रम्। (अत्र पुकारस्य लोपेन वस्त्रम् इति रूपसिद्धिः।)

पारिजातः - वारिणि जातः वारिजातः। (अत्र वकारस्य स्थाने पकारस्य वर्णविपर्ययेण पारिजातः।)

पुराणम् - पुरा नवम् -पुराणवम्। (अत्र वकारलोपेन पुराणम् इति रूपसिद्धिः।)

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

एतादृशरीत्या वर्णानां संयोगेन, विपरिणामेन, लोपेन, धात्वर्थानुसारं च शब्दाः निर्वक्तुं शक्यन्ते इत्यस्ति निरुक्तसिद्धान्तः। यास्काचार्यस्य निर्वचनविधयः आधुनिकभाषाशास्त्रकारैरपि अङ्गीकृताः समादृताश्च।।

गणितम्

लोके विद्यमानानां समेषां शास्त्राणां निदानभूतं गणयति गणितशास्त्रम्। भारतीयगणितशास्त्रस्य प्रथमं विकसितरूपं शुल्बसूत्रे द्रष्टुं शक्यते। एतत्सूत्रं कल्पाख्ये वेदाङ्गे अन्तर्भवति। तत्र कल्पे बौधायन, कात्यायन, आपस्तम्ब, सत्याषाढ, मानव ,मैत्रायणी, वाराह्यादि सप्त आचार्याणां नामभिः प्रसिद्धानि शुल्बसूत्राणि सन्ति। ज्यामिती, वर्गमूलदशांशादि गणितविज्ञानस्य समग्राख्यानं तत्रैवास्ति। नलन्दा तक्षशिलाख्ययोः विश्वविद्यालययोः गणिताध्ययनस्याध्यापनस्य च प्राधान्यमासीत्। शास्त्रेऽस्मिन् निष्णाताः आर्यभटप्रमुखाः आचार्याः तत्रासन्। एते विद्वांसः भारतीयगणितशास्त्रस्य मार्गदर्शकाः भवन्ति। अत एव स कालः भारतीयगणितशास्त्रस्य सुवर्णकाल इति व्यवह्रियते। अस्मिन् विज्ञानमण्डले शून्यस्य आविष्कारः भारतीयगणितशास्त्रस्य योगदानमेव। केषाञ्चिदाचार्याणां योगदानं यथा-

आचार्यः	**कालः**	**ग्रन्थाः**
आर्यभटः	पञ्चमे शतके	आर्यभटीयम् ।
महावीरः	नवमशतके	गणितसारसङ्ग्रहः।
श्रीपतिः	एकादशशतके	गणिततिलकम् ।

कालान्तरे तच्च गणितशास्त्रं ज्योतिश्शास्त्रेण तथा वास्तुविद्यया च सह वृद्धिमाप।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

वास्तुशास्त्रम्

वसन्ति जनाः यत्र इति वास्तु। तदधिकृत्य यस्मिन् शास्त्रे विवृणोति तद् वास्तुशास्त्रम् इति कथ्यते। वास्तुशास्त्रचर्चाः वेदेषु बहुत्र वर्तन्ते। वास्तुविद्यायाः आधाररूपः स्थापत्यवेदः अथर्ववेदस्य उपवेदः इति गण्यते। मयमतम् , मानसारः, समराङ्गणसूत्रसारः इत्यादयः वास्तुशास्त्रप्रतिपादकाः ग्रन्थाः प्रसिद्धाः। गृहनिर्माणविधिम् अधिकृत्य श्रीमङ्गलं नीलकण्ठन् मूस्सत् महाशयेन विरचिता मनुष्यालयचन्द्रिका केरलीयवास्तुशास्त्रग्रन्थेषु प्रसिद्धास्ति। भूमिलक्षणम्, परिस्थितिविचारः इत्यादीनि च ग्रन्थेऽस्मिन् यथावसरं विवृणोति। अन्यैरपि आचार्यैः कालानुसारं परिष्कृता भारतीयवास्तुविद्या परिस्थितेरनुकूलाम् आवासव्यवस्थामाविष्कर्तुं सर्वथा उपकरोति।

पदच्छेदः

चाधिकृत्य	-	च+अधिकृत्य ।
अमरकोशकारस्तु	-	अमरकोशकारः +तु।
सामान्यपरिचयोऽपि	-	सामान्यपरिचयः +अपि।
तन्निरुक्तशास्त्रम्	-	तत्+निरुक्तशास्त्रम्।
प्रणीत एव	-	प्रणीतः+एव।
अर्थनिर्णय एव	-	अर्थनिर्णयः+एव।
ग्रन्थोऽयम्	-	ग्रन्थः+अयम्।
ग्रन्थेऽस्मिन्	-	ग्रन्थे+अस्मिन्।
त्रयोऽध्यायाः	-	त्रयः+अध्यायाः।
चेति	-	च+इति।
इत्यस्ति	-	इति+अस्ति।
समादृताश्च	-	समादृताः+च।
तत्रैवास्ति	-	तत्र + एव +अस्ति।
शास्त्रेऽस्मिन्	-	शास्त्रे +अस्मिन्
केषाञ्चिदाचार्याणाम्	-	केषाञ्चिद् +आचार्याणाम्
तच्च	-	तत् +च
तदधिकृत्य	-	तद्+अधिकृत्य
अन्यैरपि	-	अन्यैः +अपि
परिस्थितेरनुकूलम्	-	परिस्थितेः +अनुकूलम्

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

विग्रहः

विज्ञानम्	-	विशिष्टं ज्ञानम्।
यथावसरम्	-	अवसरम् अनतिक्रम्य।
परिस्थितिः	-	परितः स्थितिः।

कोशः

वास्तु - धिष्ण्यमोको निवसनं स्थानं वास्तु निवेशनम्।

पठनप्रवर्तनानि

केनचिदाचार्येण सह शास्त्रविषयमधिकृत्य अभिमुखभाषणं कृत्वा लघुटिप्पणीं लिखतु।

श्रद्धेयांशाः

प्रश्नवाचकशब्दानामुचितोपयोगः।

आशयव्यक्तता।

भाषाशुद्धिः।

विविधशास्त्रग्रन्थानां ग्रन्थकाराणां च नामानि समाहृत्य विविच्य सम्पुटं निर्मातु।

श्रद्धेयांशौ

विषयवैविध्यम्।

समग्रता।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

यस्य पदस्य निर्वचनम् इति विज्ञाय कोष्ठतः अनुयोज्यं पदं चित्वा पट्टिकां पूरयतु।

नारदः	पङ्कजम्	आचार्यः	शाखा
पादपः	पायसम्	तुरगः	केशः
इतिहासः	हिमवान्	औन्नत्यम्	ऐश्वर्यम्

आचारं ग्राहयति ....।

नारं (यथार्थज्ञानम्) ददाति ....।

पयसा संस्कृतम् ....।

इति इह आस ....।

के (शीर्षे) शेते ....।

हिमम् अस्ति अस्मिन् ....।

ईश्वरस्य भावः ....।

पङ्के जातम् ....।

तुरेण (वेगेन) गच्छति ....।

उन्नतस्य भावः ....।

पादेन पिबति ....।

खे (आकाशे) शेते ....।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

मञ्जुषातः उचितं पदं स्वीकृत्य पट्टिकां पूरयत।

आर्यभटः	वराहमिहिरः	पिङ्गलः
भोजराजः	यास्कः	आपस्तम्बः
ब्रह्मगुप्तः	श्रीमङ्गलं नीलकण्ठन्मूसत्	
मयः	सायणः	

गणितम्	वास्तुशास्त्रम्	निरुक्तम्
आर्यभटः	मयः	सायणः

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

पाठः ९

आत्मबोधो विमुक्तये

केरलीयसामाजिकस्तरः इतरराज्यापेक्षया अत्युन्नतं विराजते। केरलेषु विद्यमानाः अनेके सामाजिकपरिष्कर्तारः एव अस्य निदानम्। अत्र शङ्कराचार्यादयो बहवः महात्मानः दार्शनिकाः अवर्तन्त । इतरप्रदेशेषु इदानीमपि विद्यमानानि सामाजिकासमत्वानि केरलेषु तेषां परिष्कर्तॄणाम् अश्रान्तपरिश्रमेणैव अस्तंगतानि। तेषु केषाञ्चन महात्मनां जीवनमधिकृत्य एकैका घटना अत्र प्रतिपाद्यते।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

श्री शङ्कराचार्यस्य जन्म कालट्यां पूर्णानद्याः तीरे क्रिस्त्वब्दे ७८८ तमे संवत्सरे अभूत्। पिता शिवगुरुः माता आर्याम्बा च। अद्वैतसिद्धान्तप्रघोषकोऽयं तत्प्रचारणाय चतुरः मठान् स्थापयामास। ब्रह्मसूत्रोपनिषद्भगवद्गीताभाष्याणां कर्तृत्वेन तथा सौन्दर्यलहरी विवेकचूडामणिः उपदेशसाहस्री दशश्लोकी इत्यादीनां स्वतन्त्रकर्तृत्वेन च प्रसिद्धोऽयं महात्मा द्वात्रिंशत् तमे वयसि यशःशरीरोऽभवत्।

श्रीशङ्कराचार्यः (७८८-८२०)

सन्यासदीक्षार्थं प्रस्थितः श्रीशङ्करः मातुः देहवियोगावस्थां दिव्यदृष्ट्या प्रेक्ष्य समीपमागतवान्। प्रणामानन्तरं मातुः निर्देशानुसारं सद्य एव सः शिवभुजङ्गस्तोत्रं तथा विष्णुभुजङ्गस्तोत्रं च कृत्वा आललाप। विगतमरणशङ्का सा पुनः बाल्ये तस्य इष्टगीतं गोविन्दाष्टकं श्रोतुम् ऐच्छत्। मातुः देहवियोगानन्तरं समीपस्थाः जनाः तस्य साहाय्यं कर्तुं न सन्नद्धाः। मातुः मृतदेहसंस्कारादिकं पूर्णानद्याः तीरे स्वयमेव कृत्वा तस्याः स्तुतिरूपेण मातृपञ्चकं व्यरचयत् च । तस्मिन् प्रथमः श्लोकः यथा -

आस्तां तावदियं प्रसूतिसमये दुर्वारशूलव्यथा
नैरुच्यं तनुशोषणं मलमयी शय्या च सांवत्सरी।
एकस्यापि न गर्भभारभरणक्लेशस्य यस्या क्षमो
दातुं निष्कृतिमुन्नतोऽपि तनयस्तस्यै जनन्यै नमः।।

अनन्तरम् आसेतुहिमाचलम् अटन् शङ्कराचार्यः संस्कृतभाषया एव तस्य अभिमतान् प्रचारयामास।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

श्रीचट्टम्पिस्वामी १८५३ तमे वर्षे अनन्तपुर्यां कोल्लूर् नामके ग्रामे जनिमलभत। पिता वासुदेवशर्मा माता नङ्ङम्मप्पिल्ला च । कुञ्ञन् इत्यभिधोऽयं पाठशालायां छात्रनेतृत्वं निरवहत्। अतः अयं चट्टम्पीति आहूतः अभवत्। समाजपरिष्कर्तृत्वेन,नवोत्थाननायकत्वेन, आत्मीयाचार्यत्वेन चास्य स्थानं प्रसिद्धमेव। १९२४ तमे संवत्सरे पन्मनायाम् अस्य देहवियोगोऽभूत्। प्राचीनमलयालम्, वेदाधिकारनिरूपणम्, आदिभाषा, जीवकारुण्यनिरूपणमित्यादयः अस्य प्रधानकृतयः भवन्ति।

श्रीचट्टम्पिस्वामी (१८५३-१९२४)

चट्टम्पिस्वामिनः समभावना प्रसिद्धा एव। तेन महात्मना साकं ये ये आसन् तेषां कार्येषु सः नितरां श्रद्धालुरासीत्। तेषामभिमानक्षतं कदापि न संभवेत् इति विषये सदा सः बद्धश्रद्धश्चासीत्। तादृशी एका घटना अत्र सूच्यते। एकदा एकस्मिन् गृहे विश्रमावसरे परवूर न्यायाधीशः आण्डिपिल्ला महाभागः स्वामिनं स्वगृहे सत्कर्तुं निश्चित्याहूतवान्। स्वामी तु सुहृदा साकं न्यायाधीशभवनं सम्प्राप। भार्यासमेतः न्यायाधीशः स्वामिनं स्वीकृत्य गृहान्तर्भागं प्रवेष्टुमाहूतवान्। सन्दिहानं सुहृदमपि प्रवेष्टुं स्वामी निरदिशत्। भोजनावसरेऽपि सुहृदः स्थानं प्रकोष्ठात् बहिरिति ज्ञात्वा स्वस्यापि स्थानं तत्रैव अस्तु इति तात्पर्यं प्रकटयामास। स्वामिनः मनोगतं प्रत्यभिज्ञाय न्यायाधीशः तेन सार्धम् उभाभ्यामपि भोजनव्यवस्थां कृतवान्। आध्यात्मिकविषयेषु इव लौकिककार्येष्वपि समभावना कार्या इति स्वाशयं स्वजीवनेनैव स्वामी प्रचारयामास। असौ श्रीनारायणगुरुदेवस्य ज्येष्ठकल्पः सुहृच्चासीत् ।।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

श्रीनारायणगुरुदेवः १८५६ तमे वर्षे चेम्पष़न्ति ग्रामे वयल्वारं भवने माटनाशान्-कुट्टियम्मयोः अपत्यत्वेन जनिमलभत। केरले समाजपरिष्कर्तृषु नवोत्थाननायकत्वेनायं प्रशस्तः । संस्कृते कैरल्यां च बहवः कृतयः तेन रचिताः। दर्शनमाला, निर्वृतिपञ्चकम् इत्यादयः संस्कृतग्रन्थाः तेन रचिताः। १९२८ तमे वर्षे शिवगिर्यां महानुभावोऽयं समाधिं प्राप।

श्रीनारायणगुरुदेवः (१८५६-१९२८)

श्रीनारायणगुरुदेवस्य काले समाजे सर्वेषाम् आराधनास्वातन्त्र्यं न आसीत्। देवताराधनया विद्याभ्यासेन च समुदायोद्धारणं साध्यमिति ज्ञात्वा सः देवालयान्, विद्यालयान् च संस्थाप्य जनान् पठनाय प्रचोदितवान्। १८८८ तमे वर्षे गुरुदेवः 'अरुविप्पुरे ' एकां शिवप्रतिष्ठामकरोत् । तस्मिन्नवसरे प्रतियोगित्वेनागतानां पुरतः सः 'एतदस्माकं देव एव ' इत्युक्तवान् । पुनः तत्र एवं लिखितवान् - 'जातिभेदं मतद्वेषं विना यत्र नराः समे, सोदरत्वेन तिष्ठन्ति मातृकास्थानमप्यदः' इति। बाल्य एव संस्कृतपठनमारभ्य स असामान्यपाटवेन भारतीयकाव्येषु , शास्त्रेषु च निष्णातः समजनि। मितेन , हितेन सारेण च सम्भाषणेन विनयेन च सर्वेषु तोषं जनयामास । एवं कालान्तरे महानुभावोऽयं योगी पण्डितः कविः आचार्यः इत्यादिभिः बिरुदैः प्रथितोऽभवत्।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

पदच्छेदः

कोऽपि	-	कः	+	अपि ।
निष्कृतिमुन्नतोऽपि	-	निष्कृतिमुन्नतः	+	अपि।
तनयस्तस्यै	-	तनयः	+	तस्यै।
संस्कृतेनैव	-	संस्कृतेन	+	एव।
श्रद्धालुरासीत्	-	श्रद्धालुः	+	आसीत् ।
इत्यस्मिन्	-	इति	+	अस्मिन्।
स्वस्यापि	-	स्वस्य	+	अपि ।
तत्रैव	-	तत्र	+	एव।
लौकिककार्येष्वपि	-	लौकिककार्येषु	+	अपि ।
स्वजीवनेनैव	-	स्वजीवनेन	+	एव।
सुहृच्चासीत्	-	सुहृत्	+	च + आसीत्।
इत्युक्तवान्	-	इति	+	उक्तवान्।

विग्रहः

न्यायाधीशः	-	न्याये अधीशः ।
मनोगतम्	-	मनसि गतम्।
विगतमरणशङ्का	-	मरणे शङ्का मरणशङ्का, विगता मरणशङ्का यस्याः सा ।

व्याकरणविशेषः

स्वामी तु सुहृदा **साकं** न्यायाधीशभवनं संप्राप । - "सहयुक्तेऽप्रधाने" इति सूत्रेण सह समं साकं सार्धम् इत्येतैः योगे तृतीयाविभक्तिः।

जनन्यै **नमः** । -"नमःस्वस्तिस्वाहास्वधाऽलं वषड्योगाच्च" इति सत्रेण नमः शब्दस्य योगे चतुर्थी स्यात् ।

धातुपरिचयः

प्रचारयामास	-	प्र पूर्वक चर् धातोः णिच् परस्मैपदी लिट् प्र. पु. ए. व।
सूच्यते	-	सूच् परिशून्ये कर्मणि लट् प्र. पु. ए. व।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

अवर्तत	-	वृतु आत्मनेपदी लङ् म. पु. ब. व।
अदात्	-	दाञ् दाने लङ् प्र. पु. ए. व।
समजनि	-	सं पूर्वक जनि प्रादुर्भावे लुङ् कर्तरि कर्मणि च प्र. पु. ए.व

पठनप्रवर्तनानि।

सूचनानुसारं महात्मनां जीवनचरितं लिखतु।

सूचना **- श्रीशङ्कराचार्यः - जीवनकालः ७८८-८२० - जन्मदेशः कालटि- बाल्ये संन्यासम्- अद्वैतप्रचारकः -भाष्यकारः ।**

श्रद्धेयाः अंशाः

जीवनचरितघटना।

सूचनानाम् उपयोगः।

भाषाशुद्धिः।

उपन्यासस्य आशयं संगृह्य मातृभाषायां परिवर्त्य लिखतु ।

श्रद्धेयौ अंशौ

आशयपूर्णता।

भाषाशुद्धिः।

कमपि केरलीयसामाजिकपरिष्कर्तारम् अधिकृत्य लघुटिप्पणीं लिखतु ।

श्रद्धेयाः अंशाः

आशयपूर्णता।

संक्षिप्तता।

औचित्यम्।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

वाक्येषु योजयतु।

अ) नितराम् , आ) अत्यधिकम् , इ) अतीव ।

श्रद्धेयाः अंशाः

आशयपूर्णता।

संक्षिप्तता।

वाक्यघटना।

केषाञ्चन सामूह्यपरिष्कर्तॄणां छायाचित्रसहितं जीवनचरितं सञ्चित्य सम्पुटमेकं रचयतु।

श्रद्धेयाः अंशाः

आशयपूर्णता।

उचिता भाषाशैली।

उचितं दत्तशेखरणम्।

अधिकविस्तरः।

श्रीनारायणगुरोः सन्देशाः

१. एका जातिः एको धर्म एकं दैवतं मर्त्यानाम्।

२. कोऽपि वा भवेद्धर्मः मानवः सज्जनो भवेत्।

३. मा पृच्छ, मा वद , मा चिन्तय जातिम्।

४ जातिभेदं मतद्वेषं विना यत्र नराः समे।
सोदरत्वेन तिष्ठन्ति मातृकास्थानमप्यदः।।

५. मनुष्याणां मनुष्यत्वं जातिर्गोत्वं गवां यथा।

६. मद्यं विषमेव, तन्मा पच, मा पिब, मा यच्छ।

७. आत्महिताय यदाचरितं भुवि परहिताय तदस्तु महीतले।।

८. धर्मो हि परमं दैवं धर्म एव महाधनम्।

९. सम्मिलन्तु सम्मिलन्तु योग्यतां समार्जयन्तु विद्यया प्रबुद्धतां यान्तु मानवास्सदा।।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

अय्यङ्कालिः

नाम	-	अय्यङ्कालि।
जन्म	-	१८६३
मरणम्	-	१९४१
जन्मदेशः	-	वेङ्ङानूर्।
पितरौ	-	अय्यन्- माला च
प्रधानघटनाः	-	विद्याभ्यसनार्थं तथा

सञ्चारस्वातन्त्र्यार्थं च आन्दोलनं चालयति स्म। अधःस्थितेभ्यः जनेभ्यः श्रीमूलं प्रजासभां प्राप्तः प्रथमनेता।

जीवितसन्देशः - विद्याभ्यासेनैव विमोचनं साध्यम्।

वक्कम् मुहम्मद् अब्दुल् खादर् मौलवी

नाम	-	वक्कम् मुहम्मद्अब्दुल् खादर् मौलवी।
जन्म	-	१८७३
मरणम्	-	१९३२
जन्मदेशः	-	वक्कं (तिरुवनन्तपुरम्)।
पितरौ	-	मुहम्मद्कुञ्ञ् हाषुबी च।
प्रधानघटनाः	-	स्वदेशाभिमानि पत्रस्य इस्लामिक धर्मपरिपालनसङ्घस्य च संस्थापकः।
सन्देशः	-	विज्ञानेन मुक्तिं प्राप्नोतु।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



चावर अच्चन्।

नाम	कुर्याक्कोस् एलियास् चावर।
जन्म	१८०५ फेब्रुवरि १० आलप्पुषा, कैनकरी।
प्रवर्तनानि	क्रिस्तीयपुरोहितः , सामाजिकपरिष्कर्ता, संस्कृतपाठशालास्थापकः, संस्कृतमुद्रणालयस्थापकः, सर्वधर्मावलम्बिनां विद्याभ्यसनाय पाठशाला स्थापनम्।
कृतयः	आत्मानुतापम्, मान्नानं नालागमम् ,ध्यानसंलापङ्गल् इत्यादीनि।
मृत्युः	१८७१ जनुवरी ३,कोच्चि।

आस्तां तावदियं........ ।।

अन्वयः प्रसूतिसमये इयं दुर्वारशूलव्यथा , नैरुच्यं तनुशोषणं, सांवत्सरी मलमयी शय्या च आस्तां तावत् । यस्याः गर्भभारभरणक्लेशस्य एकस्य अपि निष्कृतिं दातुं तनयः उन्नतः अपि न क्षमः । तस्यै जनन्यै नमः ।

व्याख्या प्रसवसमये कठिनवेदना, नीरुचिः, शरीरशोषणं , मलप्रचुरा सांवत्सरी शय्या एतत् सर्वं भवतु नाम । गर्भभारभरणदुःखस्य एकस्य अपि प्रतिफलं दातुं पुत्रः उन्नतः अपि न समर्थः भवति। तादृश्यै जनन्यै नमः ।

നിൽക്കട്ടേ പേറ്റുനോവിൻ കഥ രുചികുറയും കാലമേറെച്ചടപ്പും
പോയ്കോട്ടേ കൂട്ടിടേണ്ട മലമതിലൊരു കൊല്ലം കിടക്കും കിടപ്പും
ഓർക്കുമ്പോൾ ഗർഭമാകും പെരിയചുവടെടുക്കുന്നതിൻ കൂലിപോലും
നീക്കാവല്ലെത്രകേമൻ മകനുമതുനിലയ്ക്കുള്ളൊരമ്മേ തൊഴുന്നേൻ.

प्रवेशकः - स्वदेशस्य चरित्रप्राधान्यमधिकृत्य चर्चां करोतु।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

पाठः १० वंशानुचरितम्

आमुखम्

केरलीयचरित्रकाव्येषु अन्यतमं भवति **मूषिकवंशम्**। अतुलकविना विरचितेऽस्मिन् काव्ये उत्तरकेरलेषु वर्तमानस्य एषिमलानामकदेशस्य ऐतिहासिककथाः उपवर्णिताः । घोरे संग्रामे मृतिं प्राप्तस्य माहिष्मतीराजस्य आसन्नप्रसवा पत्नी कुलगुरोः साहाय्येन कोलमारुह्य नदीं तीर्त्वा एषिमला नाम गिरिं प्राप। मूषिकवृक्षैः निबिडे पर्वते गुहायाम् उषित्वा सा बालकमेकं प्रासूत। कुमारं तं परशुरामः अस्य देशस्य राजानमकरोत्। स एव मूषिकवंशस्य स्थापकः रामघटमूषिकः इति पश्चात् प्रख्यातः। मूषिकवृक्षैः (शिरीषैः) समावृतो देशः अस्य आस्थानम् इत्यनेन वंशस्यास्य नाम मूषिकवंश इति सञ्जातः।

पञ्चदशसर्गात्मकस्य मूषिकवंशकाव्यस्य त्रयोदशसर्गात् उद्धृताः केचन श्लोकाः पाठभागे दत्ताः। द्वित्राणां मूषिकवंशभूपानां चरितमेवात्र सूचितम्।

जयमानी नाम्नः राज्ञः भागिनेयः वलभः मूषिकदेशस्य राजा बभूव।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

अथ तस्य विभोरनन्तरो
विजयी सद्गुणरत्नसागरः।
बलभद्रसमानविग्रहो
वलभो नाम बभूव पार्थिवः ।। १

पदच्छेदः

विभोरनन्तरो विजयी	-	विभोः + अनन्तरः + विजयी ।
बलभद्रसमानविग्रहो वलभो नाम	-	बलभद्रसमानविग्रहः + वलभः + नाम।

विग्रहः

सद्गुणरत्नसागरः - सद्गुणाः एव रत्नानि सद्गुणरत्नानि, तेषां सागरः इव यः सः ।

बलभद्रसमानविग्रहः - बलभद्रेण समानः विग्रहः यस्य सः।

अन्वयः	अन्वयार्थः
अथ	अनन्तरम्
तस्य विभोः	तस्य राज्ञः (जयमानी इति राज्ञः)
अनन्तरः	अनन्तरजातः
विजयी	प्राप्तविजयः
बलभद्रसमानविग्रहः	बलरामस्य समानरूपी
सद्गुणरत्नसागरः	सद्गुणसम्पन्नः
वलभो नाम	वलभ इति प्रसिद्धः
पार्थिवः	भूपतिः
बभूव ।	अभवत्।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

भावार्थः

मूषिकवंशभूपतिषु अन्यतमस्य जयमानिनः अनन्तरं तस्य भागिनेयः बलभद्रसदृशः विक्रमशाली सकलप्रतापगुणवान् वलभो नाम राजा अभवत्।

राज्ञः वलभस्य धीरतामेवं वर्णयति।

रणदर्पविकस्वरेष्वलं
मुखरा यस्य मुहुः शिलीमुखाः।
वदनाम्बुरुहेषु विद्विषां
पतिताः प्राणमधून्युपादधुः ।। २

पदच्छेदः

रणदर्पविकस्वरेष्वलम्	-	रणदर्पविकस्वरेषु + अलम्।
प्राणमधून्युपादधुः	-	प्राणमधूनि + उपादधुः।

विग्रहः

रणदर्पविकस्वरेषु	-	रणेषु दर्पः रणदर्पः तेन विकस्वरः रणदर्पविकस्वरः तेषु ।
प्राणमधूनि	-	प्राणाः एव मधु प्राणमधु तानि।

अन्वयः	**अन्वयार्थः**
यस्य	वलभस्य
मुखराः	मुखरिताः
शिलीमुखाः	बाणाः/ भ्रमराः
रणदर्पविकस्वरेषु	युद्धमदेन विकासोन्मुखेषु
विद्विषाम्	शत्रूणाम्
वदनाम्बुरुहेषु	मुखपद्मेषु
पतिताः(सन्तः)	निपतिताः (सन्तः)

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

मुहुः	पुनः
प्राणमधूनि	प्राणमकरन्दानि
उपादधुः	अपिबन्
अलम्।	पर्याप्तम्।

भावार्थः

युद्धावसरे वलभप्रयुक्ताः शब्दमुखरिताः तीक्ष्णबाणाः भ्रमराः इव युद्धदर्पेण विकसितोन्मुखेभ्यो शत्रुमुखपङ्कजेभ्यो प्राणमधूनि अपिबन् ।

वलभः नृपरामम् (रिपुराममिति नामान्तरम्) भटस्थलीदेशस्य राजानमकरोत्।

अपनुद्य ततस्ततो रिपून्
स्वपरित्राणपरायणोद्यमान्।
नृपतिर्निजवंशकेतवे
नृपरामाय ददौ भटस्थलीम्।। ३

पदच्छेदः

ततस्ततो रिपून्	-	ततः + ततः + रिपून्।
नृपतिर्निजवंशकेतवे	-	नृपतिः + निजवंशकेतवे।

विग्रहः

स्वपरित्राणपरायणोद्यमान्	-	स्वस्य परित्राणं स्वपरित्राणं, तदर्थं परायणः स्वपरित्राणपरायणः, तस्मिन् उद्यमः यस्य सः स्वपरित्राणपरायणोद्यमः तान्।
निजवंशकेतवे	-	निजवंशस्य केतुः निजवंशकेतुः , तस्मै।
नृपतिः	-	नृणां पतिः, नृपतिः।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

अन्वयः	अन्वयार्थः
नृपतिः	नरपतिः (वलभः इति यावत्)
स्वपरित्राणपरायणोद्यमान्	स्वप्राणरक्षार्थं पलायमानान्
रिपून्	शत्रून्
ततस्ततः	तदनन्दरम्
अपनुद्य	दूरीकृत्य
निजवंशकेतवे	स्ववंशालङ्कारभूताय
नृपरामाय	रामो नाम राज्ञे
भटस्थलीम्	भटस्थली नाम देशम्
ददौ ।	प्रायच्छत्।

भावार्थः

अथ स्वप्राणरक्षार्थं पलायमानान् शत्रून् दूरीकृत्य वलभो नाम राजा स्ववंशालङ्कारभूताय नृपरामाय 'भटस्थली' नाम देशं प्रददौ ।

कोशः

रिपुः - रिपौ वैरिसपत्नारिद्विषद्वेषणदुर्हृदः । इत्यमरः।

वलभस्यानुजः कुन्दवर्मा नारायणपुरं नाम मन्दिरं नवीकृतवान्।

अभिरक्ष्य भुवं चिराय यो
विभवैर्न्यायवशादुपार्जितैः।
व्यधित प्रथितं मुरद्विषो
भुवि नारायणपूर्वकं पुरम्।। ४

पदच्छेदः

यो विभवैर्न्यायवशादुपार्जितैः - यः + विभवैः + न्यायवशात् + उपार्जितैः।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

मुरद्विषो भुवि - मुरद्विषः + भुवि।

विग्रहः

मुरद्विषः - मुरं द्वेष्टि इति मुरद्विट् , तस्य ।

अन्वयः	**अन्वयार्थः**
यः	वलभस्यानुजः (कुन्दवर्मा)
चिराय	चिरकालम्
न्यायवशादुपार्जितैः	न्यायकर्मभिः समार्जितैः
विभवैः	धनैः
भुवम्	देशम्
अभिरक्ष्य	संरक्ष्य
भुवि	तस्मिन् देशे
प्रथितम्	प्रसिद्धम्
मुरद्विषः	विष्णोः
नारायणपूर्वकं पुरम्	नारयणनामकं मन्दिरम्
व्यधित ।	नवमकरोत्।

भावार्थः

कुन्दवर्मा नाम राजा चिरकालं सत्कर्मभिः आर्जितैः धनसम्पद्भिः देशभरणं सम्यक् कृतवान् । सः तस्मिन् देशे नारायणपुरनामकं विष्णुमन्दिरं नवीकृतवान् ।

कुन्दवर्मणः अनन्तरं तस्य भागिनेयः पालकः देशेऽस्मिन् राजा बभूव।

अथ तत्र नृपे यशोनिधौ
स्मरणीयां गतिमभ्युपेयुषि ।
स्वसुरस्य सुतः स्मराकृतिः
पृथिवीं पालयति स्म पालकः ।। ५

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

पदच्छेदः

स्वसुरस्य	-	स्वसुः + अस्य ।

विग्रहः

यशोनिधौ	-	यशसां निधिः यशोनिधिः, तस्मिन् ।
स्मराकृतिः	-	स्मरस्य आकृतिः इव आकृतिः यस्य सः।

अन्वयः	**अन्वयार्थः**
अथ	अनन्तरम्
तत्र	तस्मिन् देशे
यशोनिधौ	सुप्रशस्ते (सुकीर्तिसम्पन्ने)
नृपे	राजनि (कुन्दवर्मा नाम राजनि)
स्मरणीयां गतिम्	नामावशेषामवस्थाम् (मृतिम्)
अभ्युपेयुषि (सति)	सम्प्राप्ते (सति)
अस्य	एतस्य (राज्ञः कुन्दवर्मणः)
स्वसुः	सोदर्याः
स्मराकृतिः	कामदेवसदृशः
सुतः	पुत्रः (भागिनेयः)
पालकः	पालको नाम राजा
पृथिवीम्	भूमिम् (मूषिकदेशम्)
पालयति स्म।	अपालयत्।

भावार्थः

प्रशस्तस्य राज्ञः कुन्दवर्मणः मरणानन्तरं तस्य भागिनेयः पालकः नाम राजा मूषिकदेशं पालयति स्म।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

पठनप्रवर्तनानि।

श्लोकान् सतालमालपतु।

श्रद्धेयाः अंशाः

उचिततालः।

भावात्मकता।

उच्चारणशुद्धिः।

श्लोकानामाशयं सङ्गृह्य वदतु लिखतु च।

श्रद्धेयाः अंशाः

आशयपूर्तिः।

भाषाशुद्धिः।

औचित्यम्।

कानिचित् केरलीयचरित्रकाव्यानि अधिकृत्य लघुटिप्पणीं लिखतु।

श्रद्धेयाः अंशाः

आशयव्यक्तता।

भाषाशुद्धिः।

औचित्यम्।

केरले विद्यमानानां देशानां पौराणिकनामानि अत्र दीयन्ते। तेषाम् इदानीन्तननामानि लिखित्वा पट्टिकां पूरयतु।

पौराणिकनामानि	इदानीन्तननामानि
कोटिलिङ्गपुरम्	
गोश्रीपुरम्	
सह्यामलकम्	
कुक्कुटक्रोडपुरम्	
स्यानन्दूरपुरम्	
तृश्शिवपुरम्	

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

अधोनिर्दिष्टाः ग्रन्थाः कस्मिन् विभागे अन्तर्भवन्ति इति विविच्य पट्टिकां पूरयतु।

आङ्गलसाम्राज्यम्	कुमारसम्भवम्	मूषिकवंशम्	किरातार्जुनीयम्
चण्डीशतकम्	नैषधीयचरितम्	केरलोदयः	नारायणीयम्
विशाखविजयम्	मूकपञ्चशति	शिशुपालवधम्	नवभारतम्

महाकाव्यम्	चरित्रकाव्यम्	स्तोत्रकाव्यम्

क्रियारूपाणि

उपादधुः - उप, आङ् -उपसर्गपूर्वक (डु)धाञ् -धारणपोषणयोः परस्मैपदी लिट् प्र.पु.ब.वचनम्।

प्र. पु -	दधौ	दधतुः	दधुः
म. पु -	दधिथ/दधाथ	दधथुः	दध
उ. पु -	दधौ	दधिव	दधिम

व्यधित -वि उपसर्गपूर्वक (डु)धाञ् -धारणपोषणयोः आत्मनेपदी लुङ् प्र.पु.ए.वचनम्।

प्र. पु -	अधित	अधिषाताम्	अधिषत
म. पु -	अधिथाः	अधिषाथाम्	अधिढ्वम्
उ. पु -	अधिषि	अधिष्वहि	अधिष्महि।।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

शब्दकोशः

संस्कृतम्	संस्कृतम्	कैरली	कन्नटम्	आङ्गलेयम्
अभिधा	नाम	പേര്	ಹೆಸರು	Name
अभिलाषपूर्तिः	इच्छासाफल्यम्	ആഗ്രഹ സാഫല്യം	ಆಗ್ರಹ ಸಾಫಲ್ಯ	Fullfilment of desire
अम्बुरुहः	कमलम्	താമര	ತಾವರೆ	Lotus
अश्रान्तपरिश्रमः	निरन्तरपरिश्रमः	നിരന്തര പരിശ്രമം	ನಿರಂತರ ಪ್ರಯತ್ನ	Continuous effort
आख्यानम्	व्याख्यानम्	വ്യാഖ്യാനം	ವ್ಯಾಖ್ಯಾನಲು	Narration
आख्ये	नामधेये	പേരിൽ	ಹೆಸರಿನಲ್ಲಿ	In the name of
आतपत्रम्	छत्रम्	കുട	ಕೊಡೆ	Umbrella
आत्मबोधः	ब्रह्मज्ञानम्	ബ്രഹ്മജ്ഞാനം	ಬ್ರಹ್ಮಜ್ಞಾನ	The ultimate knowledge
आसन्नप्रसवा	पूर्णगर्भिणी	പൂർണ്ണഗർഭിണി	ಪೂರ್ಣಗರ್ಭವತಿ ಬಸಿರು / ಗರ್ಬಿಣಿ	Pregnant lady about to deliver
उपादधुः	अपिबन्	കുടിച്ചു	ನೀರು ಕುಡಿತು	Drunk
कोलः	नौका	വഞ്ചി	ದೋಣಿ	Boat
कृतितल्लजः	प्रशस्ता कृतिः	ഉത്കൃഷ്ട കൃതി	ಪ್ರಸಿದ್ಧ ಕೃತಿ	Beautiful Composition
ज्येष्ठकल्पः	ज्येष्ठसदृशः	ജ്യേഷ്ഠതുല്യൻ	ಹಿರಿಯಣ್ಣನಿಗೆ ಸಮಾನ	Equal to elder brother
दिङ्मात्रम्	अल्पमात्रम्	കുറച്ചുമാത്രം	ಸ್ವಲ್ಪಮಾತ್ರ	A little
दिदृक्षति	द्रष्टुम् इच्छति	കാണാൻ ആഗ്രഹിക്കുന്നു	ನೋಡಲು ಆತುರ	Desires to see
द्विट्	शत्रुः	ശത്രു	ಶತ್ರು	Enemy
निर्वक्तुम्	निर्वचनं कर्तुम्	നിർവചിക്കുവാൻ	ನಿರ್ವಚಿಸಲು	To define
निष्कृतिः	प्रतिकृतिः	കടം വീട്ടൽ	ಸಾಲತೀರಿಸಲು	Paying debt

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

निष्णातः	समर्थः	സമർത്ഥൻ	ಚತುರ	Efficient
परित्रातुम्	रक्षितुम्	രക്ഷിക്കാൻ	ರಕ್ಷಿಸಲು	To save
पार्थिवः	राजा	രാജാവ്	ಅರಸು	King
पुरस्कृत्य	पुरः कृत्वा	മുൻനിർത്തിയിട്ട്	ಮುಂದೆಇಟ್ಟು	Having placed in front of
प्रख्यातः	प्रसिद्धः	പ്രസിദ്ധൻ	ಪ್ರಖ್ಯಾತ	Famous
प्रतियोगित्वम्	मात्सर्यम्	മത്സരം	ಸ್ಪರ್ಧೆ	Competition
प्रणीतः	रचितः	രചിക്കപ്പെട്ട	ರಚಿಸಲ್ಪಟ್ಟ	Composed
प्राग्रूपम्	पूर्वरूपम्	പൂർവരൂപം	ಪೂರ್ವರೂಪ	Previous form
ब्रह्मभूयः	ब्रह्मत्वम्	ദിവംഗതൻ	ದಿವಂಗತ	Dead
भागिनेयः	सहोदरीपुत्रः	അനന്തരവൻ	ಸಹೋದರಿ ಪುತ್ರ	Nephew
मठः	धाम	മഠം	ಧಾಮ	Math
मनोगतम्	अभिप्रायः	ഉള്ളിലിരുപ്പ്	ಇಚ್ಛೆ	Notion
मूषिकः	शिरीषः	ശിരീഷപുഷ്പം	ಶಿರೀಷ ಹೂ	Shireesha Flower
वपुः	कायः	ശരീരം	ಶರೀರ	Body
विमुक्तः	स्वतन्त्रः	മോക്ഷം സിദ്ധിച്ച	ವಿಮೋಚನೆ	Liberated
विवृणोति	विशदीकरोति	വിവരിക്കുന്നു	ವಿವರಿಸುತ್ತದೆ	Explaining
व्यवह्रियते	उच्यते	പറയപ്പെടുന്നു	ಹೇಳಲ್ಪಡುತ್ತದೆ	Being said
शिलीमुखः	बाणः	ബാണം /വണ്ട്	ಬಾಣ / ದುಂಬಿ	Arrows/beetle
समग्रम्	समस्तम्	മുഴുവൻ	ಎಲ್ಲಾ	Whole
समेषाम्	सर्वेषाम्	എല്ലാവരുടെയും	ಎಲ್ಲರ	Of everybody
सांवत्सरी	संवत्सरं यावत्	ഒരു വർഷം വരെ	ಒಂದು ವರ್ಷದ ವರೆಗೆ	Upto one year
स्मरः	कामः	കാമദേവൻ	ಕಾಮದೇವ	Cupid

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

अभ्यासपत्रिका -३

१) उदाहरणानुसारं विग्रहवाक्यानि लिखतु।

उदा - सपल्लवम् - पल्लवेन सह वर्तते।
सबहुमानम् - ....।
सादरम् - ....।

२) खण्डिकां पठित्वा अधोदत्तानां प्रश्नानाम् उत्तराणि लिखतु।

षट्सु वेदाङ्गेषु प्रमुखं भवति व्याकरणम् । संस्कृतवैयाकरणेषु प्रसिद्धोऽस्ति भगवान् पाणिनिः । तेन विरचिता अष्टाध्यायी पाणिनीयम् इति प्रसिद्धम् भवति। सूत्ररूपेण विरचितेऽस्मिन् ग्रन्थे मार्कि चतुस्सहस्रसूत्राणि विद्यन्ते। संस्कृतभाषायाः समग्रमपि व्याकरणकार्यम् अत्र संक्षेपेण प्रतिपादयति।

१) ' समस्तम् ' इत्यर्थकं पदं किम्?
२) अष्टाध्याय्याः कर्ता कः ?
३) षट्सु वेदाङ्गेषु प्रमुखं किम्?
४) **विरचितेऽस्मिन्** इति पदं विश्लेषयत ।

३) यथोचितं योजयत।

आतपत्रम् - अलं करोति अनेन।
पुराणम् - वपुः त्रायते।
आचार्यः - पुरा नवम्।
वस्त्रं - आतपात् त्रायते।
अलङ्कारः - आचारं ग्राहयति।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

४) सूचनामनुसृत्य लघूपन्यासं लिखतु।

सूचना -

प्रथमः विश्वविद्यालयः – तक्षशिला – सहस्राधिकाः छात्राः – नालन्दा – सिन्धुनदीतटसंस्कृतिः।

५) वेदानां वेदाङ्गानां च विविच्य पट्टिकां रचयतु।

सामः	कल्पम्	छन्दः	ऋक्
ज्योतिषम्	निरुक्तम्	अथर्वः	शिक्षा
व्याकरणम्	यजुः		

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

किमधिगतम् ?

निर्देशः - प्रवर्तनानि यथाकालं कृतानि चेत् साधुसूचकचिह्नं (√) क्रियताम्

क्रम-संख्या	प्रवर्तनानि	सम्यक् कृतम्	भागिकतया कृतम्	क्लेशनिर्देशः	परिहारबोधनम् (संख्यया सूचितम्)
१					
२					
३					
४					
५					
६					

१ अध्यापकस्य साहाय्येन । २ सुहृदः साहाय्येन। ३ अन्येषां साहाय्येन।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

കുറിപ്പുകൾ

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

കുറിപ്പുകൾ

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

ഭാരതത്തിന്റെ ഭരണഘടന

ഭാഗം IV ക

മൗലിക കർത്തവ്യങ്ങൾ

51 ക. മൗലിക കർത്തവ്യങ്ങൾ - താഴെപ്പറയുന്നവ ഭാരതത്തിലെ ഓരോ പൗരന്റെയും കർത്തവ്യം ആയിരിക്കുന്നതാണ്:

(ക) ഭരണഘടനയെ അനുസരിക്കുകയും അതിന്റെ ആദർശങ്ങളെയും സ്ഥാപനങ്ങളെയും ദേശീയപതാകയെയും ദേശീയഗാനത്തെയും ആദരിക്കുകയും ചെയ്യുക;

(ഖ) സ്വാതന്ത്ര്യത്തിനുവേണ്ടിയുള്ള നമ്മുടെ ദേശീയസമരത്തിന് പ്രചോദനം നൽകിയ മഹനീയാദർശങ്ങളെ പരിപോഷിപ്പിക്കുകയും പിൻതുടരുകയും ചെയ്യുക;

(ഗ) ഭാരതത്തിന്റെ പരമാധികാരവും ഐക്യവും അഖണ്ഡതയും നിലനിർത്തുകയും സംരക്ഷിക്കുകയും ചെയ്യുക;

(ഘ) രാജ്യത്തെ കാത്തുസൂക്ഷിക്കുകയും ദേശീയ സേവനം അനുഷ്ഠിക്കുവാൻ ആവശ്യപ്പെടുമ്പോൾ അനുഷ്ഠിക്കുകയും ചെയ്യുക;

(ങ) മതപരവും ഭാഷാപരവും പ്രാദേശികവും വിഭാഗീയവുമായ വൈവിധ്യങ്ങൾക്കതീതമായി ഭാരതത്തിലെ എല്ലാ ജനങ്ങൾക്കുമിടയിൽ, സൗഹാർദവും പൊതുവായ സാഹോദര്യമനോഭാവവും പുലർത്തുക. സ്ത്രീകളുടെ അന്തസ്സിന് കുറവു വരുത്തുന്ന ആചാരങ്ങൾ പരിത്യജിക്കുക;

(ച) നമ്മുടെ സംസ്കാരസമന്വയത്തിന്റെ സമ്പന്നമായ പാരമ്പര്യത്തെ വിലമതിക്കുകയും നിലനിറുത്തുകയും ചെയ്യുക;

(ഛ) വനങ്ങളും തടാകങ്ങളും നദികളും വന്യജീവികളും ഉൾപ്പെടുന്ന പ്രകൃത്യാ ഉള്ള പരിസ്ഥിതി സംരക്ഷിക്കുകയും അഭിവൃദ്ധിപ്പെടുത്തുകയും ജീവികളോട് കാരുണ്യം കാണിക്കുകയും ചെയ്യുക;

(ജ) ശാസ്ത്രീയമായ കാഴ്ചപ്പാടും മാനവികതയും, അന്വേഷണത്തിനും പരിഷ്കരണത്തിനും ഉള്ള മനോഭാവവും വികസിപ്പിക്കുക;

(ഝ) പൊതുസ്വത്ത് പരിരക്ഷിക്കുകയും ശപഥം ചെയ്ത് അക്രമം ഉപേക്ഷിക്കുകയും ചെയ്യുക;

(ഞ) രാഷ്ട്രം യത്നത്തിന്റെയും ലക്ഷ്യപ്രാപ്തിയുടെയും ഉന്നതതലങ്ങളിലേക്ക് നിരന്തരം ഉയരത്തക്കവണ്ണം വ്യക്തിപരവും കൂട്ടായതുമായ പ്രവർത്തനത്തിന്റെ എല്ലാ മണ്ഡലങ്ങളിലും ഉൽകൃഷ്ടതയ്ക്കുവേണ്ടി അധ്വാനിക്കുക.

(ട) ആറിനും പതിനാലിനും ഇടയ്ക്ക് പ്രായമുള്ള തന്റെ കുട്ടിക്കോ തന്റെ സംരക്ഷണയിലുള്ള കുട്ടികൾക്കോ, അതതു സംഗതി പോലെ, മാതാപിതാക്കളോ രക്ഷാകർത്താവോ വിദ്യാഭ്യാസത്തിനുള്ള അവസരങ്ങൾ ഏർപ്പെടുത്തുക.

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

കുട്ടികളുടെ അവകാശങ്ങൾ

പ്രിയമുള്ള കുട്ടികളേ,

നിങ്ങൾക്കുള്ള അവകാശങ്ങളെന്തെല്ലാമെന്ന് അറിയേണ്ടതില്ലേ? അവകാശങ്ങളെക്കുറിച്ചുള്ള അറിവ് നിങ്ങളുടെ പങ്കാളിത്തം, സംരക്ഷണം, സാമൂഹ്യനീതി എന്നിവ ഉറപ്പാക്കാൻ പ്രേരണയും പ്രചോദനവും നൽകും. നിങ്ങളുടെ അവകാശങ്ങൾ സംരക്ഷിക്കാൻ ഇപ്പോൾ ഒരു കമ്മിഷൻ പ്രവർത്തിക്കുന്നുണ്ട്. കേരള സംസ്ഥാന ബാലാവകാശസംരക്ഷണ കമ്മീഷൻ എന്നാണ് അതിന്റെ പേര്. എന്തെല്ലാമാണ് നിങ്ങൾക്കുള്ള അവകാശങ്ങൾ എന്നു നോക്കാം.

- സംസാരത്തിനും ആശയപ്രകടനത്തിനുമുള്ള സ്വാതന്ത്ര്യം
- ജീവന്റെയും വ്യക്തിസ്വാതന്ത്ര്യത്തിന്റെയും സംരക്ഷണം
- അതിജീവനത്തിനും പൂർണവികാസത്തിനുമുള്ള അവകാശം
- ജാതി-മത-വർഗ-വർണ ചിന്തകൾക്കതീതമായി ബഹുമാനിക്കപ്പെടാനും അംഗീകരിക്കപ്പെടാനുമുള്ള അവകാശം
- മാനസികവും ശാരീരികവും ലൈംഗികവുമായ പീഡനങ്ങളിൽ നിന്നുള്ള സംരക്ഷണത്തിനും പരിചരണത്തിനുമുള്ള അവകാശം
- പങ്കാളിത്തത്തിനുള്ള അവകാശം
- ബാലവേലയിൽനിന്നും ആപത്കരമായ ജോലികളിൽ നിന്നുമുള്ള മോചനം
- ശൈശവവിവാഹത്തിൽനിന്നുള്ള സംരക്ഷണം
- സ്വന്തം സംസ്കാരം അറിയുന്നതിനും അതനുസരിച്ച് ജീവിക്കുന്നതിനുമുള്ള സ്വാതന്ത്ര്യം
- അവഗണനകളിൽ നിന്നുള്ള സംരക്ഷണം
- സൗജന്യവും നിർബന്ധിതവുമായ വിദ്യാഭ്യാസ അവകാശം
- കളിക്കാനും പഠിക്കാനുമുള്ള അവകാശം
- സ്നേഹവും സുരക്ഷയും നൽകുന്ന കുടുംബവും സമൂഹവും ലഭ്യമാകാനുള്ള അവകാശം

നിങ്ങളുടെ ചില ഉത്തരവാദിത്വങ്ങൾ

- സ്കൂൾ, പൊതുസംവിധാനങ്ങൾ എന്നിവ നശിപ്പിക്കാതെ സംരക്ഷിക്കുക.
- സ്കൂളിലും പഠനപ്രവർത്തനങ്ങളിലും കൃത്യനിഷ്ഠ പാലിക്കുക.
- സ്കൂൾ അധികാരികളെയും അധ്യാപകരെയും മാതാപിതാക്കളെയും സഹപാഠികളെയും ബഹുമാനിക്കുകയും അംഗീകരിക്കുകയും ചെയ്യുക.
- ജാതി-മത-വർഗ-വർണ ചിന്തകൾക്കതീതമായി മറ്റുള്ളവരെ ബഹുമാനിക്കാനും അംഗീകരിക്കാനും സന്നദ്ധരാവുക.

ബന്ധപ്പെടേണ്ട വിലാസം:

കേരള സംസ്ഥാന ബാലാവകാശസംരക്ഷണ കമ്മീഷൻ

'ശ്രീ ഗണേഷ്', റ്റി.സി. 14/2036, വാൻറോസ് ജംഗ്ഷൻ,

കേരള യൂണിവേഴ്സിറ്റി പി.ഒ, തിരുവനന്തപുരം-34, ഫോൺ: 0471-2326603

ഇ-മെയിൽ: childrights.cpcr@kerala.gov.in, rte.cpcr@kerala.gov.in

വെബ്സൈറ്റ്: www.kescpcr.kerala.gov.in

ചൈൽഡ് ഹെൽപ്പ്ലൈൻ - 1098, ക്രൈം സ്റ്റോപ്പർ - 1090, നിർഭയ - 1800 425 1400

കേരള പോലീസ് ഹെൽപ്പ് ലൈൻ - 0471 - 3243000/44000/45000

online R.T.E Monitoring: www.nireekshana.org.in

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

केरळपाठावलिः

संस्कृतम्

नवमी कक्ष्या

अक्कादमिक-संस्कृतविद्यालयानां कृते

भागः 1 $\frac{1}{2}$

KERALA READER
SANSKRIT

STANDARD

9

For Academic and Sanskrit Schools

PART - 1 $\frac{1}{2}$

Government of Kerala
Department of General Education

State Council of Educational Research and Training (SCERT), Kerala
2019

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

राष्ट्रगीतम्

जनगण मन अधिनायक जय हे
भारत भाग्यविधाता।
पंजाब सिन्ध गुजरात मराठा
द्राविड उत्कल बंगा।
विन्ध्य हिमाचल यमुना गंगा
उच्छलजलधि तरंगा।
तव शुभ नामे जागे
तव शुभ आशिष मागे
गाहे तव जय-गाथा।
जनगण मंगलदायक जय हे
भारत भाग्यविधाता
जय हे जय हे जय हे
जय जय जय जय हे।

प्रतिज्ञा

भारतं मम राष्ट्रम्। सर्वे भारतीयाः मे भ्रातरः। अहं मम राष्ट्रे स्निह्यामि। तस्य समृद्धायां नानाविधायां च पूर्विकसम्पत्तौ अभिमानी च भवामि। तद्योग्यतां सम्पादयितुं सदा यतिष्ये च। अहं पितरौ गुरूंश्चादरिष्ये, बहुमानयिष्ये च। विनयान्वित एवाहं सदा सर्वैः सह व्यवहरिष्ये, सर्वेषु प्राणिषु दयालुर्वर्तिष्ये च। मम राष्ट्राय राष्ट्रियेभ्यश्चाहं समर्पये स्वसेवाम्। राष्ट्रियाणां योगक्षेमैश्वर्येष्वेवाहम् आत्मनस्तोषं कलयामि।

State Council of Educational Research and Training (SCERT)
Poojappura, Thiruvananthapuram 695012, Kerala
Website: www.scertkerala.gov.in
email: scertkerala@gmail.com
Phone:0471-2341883, fax:0471-231869
Typesetting and Layout: SCERT
First Edition: 2019
Printed at : KBPS, Kakkanad, Kochi-30
Department of Education, Government of Kerala

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

भूमिका

प्रिय छात्राः !

परिष्कृता अस्माकं पाठ्यपद्धतिः प्रवर्तनाधिष्ठिता छात्रकेन्द्रीकृता च भवति। छात्राणां सर्वतोमुखं विकासमेव अस्याः पद्धतेः लक्ष्यम्। तदनुसारमेव पाठ्यक्रमः स्वीकृतः। पाठ्यक्रमे पाठपुस्तकस्य अद्वितीयं स्थानमस्ति। स्वयं पठनाय सङ्घपठनाय भाषानैपुणीनां विकासाय च पाठपुस्तकमुपकरोति।

अष्टमकक्ष्याया अनुस्यूततया एवास्य पुस्तकस्य रचना प्रवृत्ता। विविधानां व्यवहाररूपाणां परिचायनाय पुस्तकेऽस्मिन् पठनसन्दर्भाः आयोजिताः। पठितानामाशयानां दृढीकरणाय नूतनसन्दर्भेषु प्रयोगाय स्वयं मूल्यनिर्णयाय चावकाशः यथायोग्यं दत्तानि।

पाठसुस्तकस्यास्य प्रथमे भागे एककद्वयम् अस्ति। विषयानुसारमेव एककानां नामानि। प्रत्येकम् एककस्य प्रारम्भे आमुखम्, प्रवेशकप्रवर्तनं च दत्तमस्ति। पाठस्यान्ते प्रवर्तनानि अधिकपठनांशाः चाक्रिकारोहणप्रक्रिया च दत्ताः। पाठभागे अधिकसूचनार्थं केचन भागाः प्रत्येकं पङ्क्तिषु दत्ताः। एष भागः अधिकांशस्वीकाराय एव न तु मूल्यनिर्णयाय। एककानामन्ते शब्दकोशः पृथक् दत्तः। पाठभागेष्वागतानां व्याकरणांशानां विवरणं यथास्थानं दत्तमस्ति।

राष्ट्रिय-कर्मनैपुणीपद्धतिं (NSQF) यदृच्छया समागच्छन्तीं दुर्घटनां निवारयितुं समर्थानि, जीवननैपुणीसंवर्धकानि प्रवर्तनानि तथा समग्रशिक्षा द्वारिकायाः कृते सूचना संवेदन तान्त्रिक- (ICT) साध्यताश्च परिगणय्य सम्पुष्टीकृतं वर्तते इदं पाठपुस्तकम्।

भाषापठनं सुगमं सरसं च कर्तुं पाठपुस्तकमिदं पर्याप्तमिति चिन्तयामि। संस्कृतपठनं सर्वदा मधुरं ललितं सफलं च भवतु इति आशासे।

डा.जे.प्रसाद्
निदेशकः
राज्यशैक्षिकानुसन्धानप्रशिक्षणपरिषद्,केरळम्।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

राज्यशैक्षिकानुसन्धानप्रशिक्षणपरिषद्, केरळम्

STATE COUNCIL OF EDUCATIONAL RESEARCH AND TRAINING, KERALA

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

भागः 1

विषयानुक्रमणिका

एककम्		पाठस्य नाम	व्यवहाररूपम्	पुटसंख्या
I वनमाला	१	अमृतबिन्दवः।	(सुभाषितानि)।	८
	२	प्रलोभनादुत्सर।	(कथा)।	१८
	३	श्रियो मूलमनिर्वेदः।	(काव्यम्)।	२६
II कौमुदी	४	देविश्री।	(यात्राविवरणम्)।	४८
	५	माकन्दमञ्जरी।	(गीतकम्)।	५४

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

पुस्तकसंरक्षणम्

'तैलाद्रक्ष जलाद्रक्ष रक्ष मां श्लथबन्धनात्।
परहस्तगताद्रक्ष'- नित्यं रोदिति पुस्तकम्।।

संस्कृतभाषा

भाषासु मधुरा रम्या हृद्या गीर्वाणभारती।

विद्यायाः महत्वम्

सर्वेषां शोभमानानां शोभनतमा विद्या।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

एककम्
१

वनमाला

आमुखम्

विविधैः कुसुमैः ग्रथिता वनमाला इव विविधैः सुभाषितैः उपदेशसम्पुष्टं भवति संस्कृतसाहित्यम्। वनमालेति अस्मिन्नेकके **अमृतबिन्दवः** इति सुभाषितसञ्चयः **प्रलोभनादुत्सर** इति हितोपदेशकथा तथा रामायणात् समाकलितः **श्रियो मूलमनिर्वेदः** च इति त्रयः पाठाः आयोजिताः।

प्रवेशकम् - **सज्जनप्रशंसापराणि सुभाषितानि सञ्चिनुत।**

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

पाठः १

अमृतबिन्दवः



आमुखम्

संस्कृतभाषा संस्कृतिवाहिनी भवति। तस्याम् उपदेशपराणि, संस्कृतिद्योतकानि च बहूनि सुभाषितानि सन्ति। भारतीयसंस्कृतेः पालनपोषणप्रसारणेषु संस्कृतभाषायाः योगदानं महदेव। वसुधैव कुटुम्बकम् , मातृदेवो भव, पितृदेवो भव, आचार्यदेवो भव इत्याद्याः सूक्तयः भारतीयसंस्कृतेः महिमानम् उद्घोषयन्ति। विक्रमचरितं, चाणक्यनीतिः, विक्रमाङ्कदेवचरितं, सुभाषितभण्डागारं, नीतिशतकम् इत्यादिभ्यः प्रशस्तसुभाषितग्रन्थेभ्यः च स्वीकृतानि कानिचन सुभाषितानि अत्र दत्तानि। तानि धर्माचरणाय अर्थसमाहरणाय, कर्तव्यपालनाय, सन्मार्गानुसरणाय च छात्रान् प्रेरयन्ति।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

प्रथमवयसि दत्तं तोयमल्पं स्मरन्तः
शिरसि निहितभाराः नारिकेला नराणाम् ।
सलिलममृतकल्पं दध्युराजीवनान्तं
न हि कृतमुपकारं साधवो विस्मरन्ति।। १

(विक्रमचरितम्)

पदच्छेदः

साधवो विस्मरन्ति	-	साधवः + विस्मरन्ति।
नारिकेला नराणाम्	-	नारिकेलाः + नराणाम्।
दध्युराजीवनान्तम्	-	दध्युः + आजीवनान्तम्।

विग्रहः

निहितभाराः	-	निहितः भारः यैः ते ।
अमृतकल्पम्	-	अमृतेन तुल्यम् ।
आजीवनान्तम्	-	जीवनान्तं यावत्।

अन्वयः	**अन्वयार्थः**
प्रथमवयसि दत्तम्	बाल्यकाले सिक्तं, पीतं वा ।
अल्पं तोयं स्मरन्तः	जललेशमपि स्मरन्तः ।
नारिकेलाः	नालिकेरवृक्षाः ।
शिरसि निहितभाराः	मूर्धनि धृतफलाः ।
नराणां(कृते)	मनुष्याणां (कृते) ।
अमृतकल्पं सलिलम्	अमृततुल्यं जलम् ।
आजीवनान्तम्	जीवितपर्यन्तम् ।
दध्युः।	वहेयुः ।
हि	यस्मात् करणात्

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

साधवः	सज्जनाः ।
कृतमुपकारम्	कृतोपकृतिं
न विस्मरन्ति ।	न अधीयन्ति / न अधियन्ति।

भावार्थः

बाल्यकाले (रोपणसमये) सिक्तम् अल्पमात्रं जलं स्मरन्तः नारिकेलवृक्षाः मनुष्याणां कृते आजीवनम् अमृततुल्यं स्वादिष्टं जलं वहेयुः । सज्जनाः अन्यैः कृतम् उपकारम् आजीवनं न विस्मरन्ति इत्यर्थः ।

कोशः

तोयम् - अम्भोऽर्णस्तोयपानीयनीरक्षीराम्बुशम्बरम् ।।

नरः - मनुष्या मानुषा मर्त्या मनुजा मानवा नराः ।
स्युः पुमांसः पञ्चजनाः विदुषा पूरुषा नरः ।।

नारिकेलः - नालिकेरस्तु लाङ्गली ।

साधुः - महाकुलकुलीनार्यः सभ्यसज्जनसाधवः ।

क्रियापदानि

दध्युः - डुधाञ् धारणपोषणयोः दाने च परस्मैपदी विधिलिङ् प्र. पु. ब. व।

विस्मरन्ति - वि + स्मृ चिन्तायां लट् परस्मैपदी प्र. पु. ब. व ।

कुचेलिनं दन्तमलोपधारिणं
बह्वाशिनं निष्ठुरवाक्यभाषिणम्।
सूर्योदये चास्तमये च शायिनं
विमुञ्चति श्रीरपि चक्रपाणिनम् ।। २ (चाणक्यनीतिः)

पदच्छेदः

चास्तमये	-	च	+	अस्तमये।
श्रीरपि	-	श्रीः	+	अपि।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

विग्रहः

कुचेलिनम्	-	कुत्सितं चेलं यस्य सः कुचेली, तम् ।
दन्तमलोपधारिणम्	-	दन्तेषु मलम् उपधरति इति दन्तमलोपधारी, तम् ।
बह्वाशिनम्	-	बहु अश्नातुं शीलम् अस्य बह्वाशी, तम् ।
निष्ठुरवाक्यभाषिणम्	-	निष्ठुरं वाक्यं भाषितुम् शीलम् अस्य इति निष्ठुरवाक्यभाषी, तम् ।
शायिनम्	-	शेतुं शीलम् अस्य इति शायी, तम् ।
चक्रपाणिनम्	-	चक्रं पाणौ यस्य सः चक्रपाणी, तम् ।

अन्वयः	**अन्वयार्थः**
कुचेलिनम्	मलिनवस्त्रधारिणम्
दन्तमलोपधारिणम्	दन्तधावने विमुखम्
निष्ठुरवाक्यभाषिणम्	क्रूरसम्भाषणं कुर्वन्तम्
बह्वाशिनम्	अमितभक्षणशीलवन्तम्
सूर्योदये अस्तमये च	सूर्यस्य उदये अस्तमये च
शायिनम्	शयनशीलम्
चक्रपाणिनम् अपि	विष्णुम् अपि
श्रीः	लक्ष्मीदेवी
विमुञ्चति ।	त्यजति ।

भावार्थः

मलिनवस्त्रधारिणं, दन्तशुद्धीकरणे विमुखम्, अमितभक्षणशीलवन्तं, क्रूरभाषणं कुर्वन्तं प्रभाते प्रदोषे च शयनं पुरुषोत्तमं, भगवन्तं विष्णुम् अपि लक्ष्मीदेवी परित्यजति इत्यर्थः ।

कोशः

चेलम्	-	वस्त्रमाच्छादनं वासश्चेलं वसनमंशुकम्।
दन्तः	-	रदना दशना दन्ता रदाः।
श्रीः	-	लक्ष्मीः पद्मालया पद्मा कमला श्रीर्हरिप्रिया । इन्दिरा लोकमाता मा रमा मङ्गलदेवता। भार्गवी लोकजननी क्षीरसागरकन्यका ।।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

चक्रपाणिः - उपेन्द्र इन्द्रावरजश्चक्रपाणिश्चतुर्भुजः ।

क्रियापदम्

विमुञ्चति - वि पूर्वक मुच्लृ मोक्षणे लट् परस्मैपदी प्र. पु. ए. व।

उदयति यदि भानुः पश्चिमे दिग्विभागे
प्रचलति यदि मेरुः शीततां याति वह्निः ।
विकसति यदि पद्मं पर्वताग्रे शिलायां
न भवति पुनरुक्तं भाषितं सज्जनानाम् ।। ३

(विक्रमाङ्कदेवचरितम्)

अन्वयः	अन्वयार्थः
यदि भानुः	यदि सूर्यः ।
पश्चिमे दिग्विभागे	प्रतीच्यां दिशि ।
उदयति।	उदेति।
(यदि) मेरुः प्रचलति	यदि सुमेरुपर्वतः चलति (सञ्चरति)।
(यदि) वह्निः शीततां याति	यदि अग्निः शैत्यं प्राप्नोति ।
(यदि)पद्मं पर्वताग्रे शिलायां विकसति	यदि नलिनं पर्वताग्रे शिलातले प्रफुल्लति।
तथापि सज्जनानां भाषितम्	तथापि महतां वचनम् ।
पुनरुक्तं न भवति।	द्विरुक्तं न भवति (पुनः पुनः न वदति इति)।

भावार्थः

सूर्यः प्रतीच्याम् उदयति । अचलः सुमेरुः चलति। अग्निः शैत्यं प्राप्नोति। नलिनं पर्वताग्रे शिलातले प्रफुल्लति। एतत् सर्वम् असम्भाव्यं खलु? यद्यपि तत्सर्वं सम्भवति तथापि सज्जनानां वाक्यं द्विरुक्तं न भवति । सज्जनाः उक्तात् न व्यतिचलन्तीत्यर्थः।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

कोशः

भानुः - भानुर्हंससहस्रांशुः सविता तपनो रविः।

मेरुः - मेरुः सुमेरुः हेमाद्रिः रत्नसानुसुरालयः ।

वह्निः - अग्निर्वैश्वानरोवह्निर्वीतिहोत्रो धनञ्जयः ।

पद्मम् - वा पुंसि पद्मं नलिनमरविन्दं महोत्पलम् ।

शिला - पाषाणप्रस्तरग्रावोपलाश्मानः शिला दृषत् ।

क्रियापदानि

उदयति - उद्पूर्वक अय गतौ लट् परस्मैपदी प्र. पु. ए. व।

प्रचलति - प्र पूर्वक चल गतौ लट् परस्मैपदी प्र. पु. ए. व।

विकसति - वि + कस् गतौ लट् परस्मैपदी प्र. पु. ए. व।

तृणानि नोन्मूलयति प्रभञ्जनो
मृदूनि नीचैः प्रणतानि सर्वतः ।
समुच्छ्रितानेव तरून् प्रबाधते
महान् महत्येव करोति विक्रमम् ।।   ४

(सुभाषितभण्डागारम्)

पदच्छेदः

नोन्मूलयति - न + उन्मूलयति।

प्रभञ्जनो मृदूनि - प्रभञ्जनः + मृदूनि।

महत्येव - महति + एव ।

विग्रहः

प्रभञ्जनः - प्रकर्षेण भञ्जयति वृक्षादीन् इति ।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

अन्वयः	अन्वयार्थः
प्रभञ्जनः	प्रचण्डो वायुः
सर्वतः नीचैः प्रणतानि	सर्वत्र अधस्तात् विनम्राणि
मृदूनि तृणानि	लघूनि तृणानि
नोन्मूलयति।	न नाशयति ।
समुच्छ्रितान्	उन्नतान्
तरून् एव	वृक्षान् एव (बाधते)
महान् महति एव	बलवान् बलयुक्ते एव
विक्रमं करोति ।	शूरतां प्रकटयति ।

भावार्थः

प्रचण्डमारुतः सर्वत्र अधस्तात् विनम्राणि लघूनि तृणानि न नाशयति। सः उन्नतशीर्षान् वृक्षान् एव बाधते। कुत इति चेत् बलवान् शक्तियुक्ते पुरुषे एव पराक्रमं करोति ।

कोशः

प्रभञ्जनः - समीरमारुतमरुत् जगत्प्राणसमीरणाः ।
नभस्वद्वातपवनपवमानप्रभञ्जनाः ।।

तरुः - वृक्षो महीरुहः शाखी विटपी पादपस्तरुः।

विक्रमम् - शक्तिः पराक्रमप्राणौ विक्रमस्त्वतिशक्तिता ।

क्रियापदानि

प्रबाधते - प्र पूर्वक बाधृ लोडने लट् आत्मनेपदी प्र. पु. ए. व।

उन्मूलयति - उद् + मूल प्रतिष्ठायां लट्. परस्मैपदी प्र. पु. ए. व।

शक्यो वारयितुं जलेन हुतभुक् छत्रेण सूर्यातपो
नागेन्द्रो निशिताङ्कुशेन समदो दण्डेन गोगर्दभौ।
व्याधिर्भेषजसंग्रहैश्च विविधैर्मन्त्रप्रयोगैर्विषं
सर्वस्यौषधमस्ति शास्त्रविहितं मूर्खस्य नास्त्यौषधम् ।। ५

(नीतिशतकम्)

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

पदच्छेदः

शक्यो वारयितुम्	-	शक्यः + वारयितुम्।
व्याधिर्भेषजसंग्रहैश्च	-	व्याधिः + भेषजसङ्ग्रहैः + च।
विविधैर्मन्त्रप्रयोगैर्विषं	-	विविधैः + मन्त्रप्रयोगैः + विषम्।
सर्वस्यौषधमस्ति	-	सर्वस्य + औषधम् + अस्ति।
सूर्यातपो नागेन्द्रो निशिताङ्कुशेन	-	सूर्यातपः +नागेन्द्रः + निशिताङ्कुशेन।
समदो दण्डेन	-	समदः + दण्डेन।
नास्त्यौषधम्	-	न + अस्ति + औषधम्।

विग्रहः

निशिताङ्कुशेन	-	निशितः च असौ अङ्कुशः च, तेन।
नागेन्द्रः	-	नागानां इन्द्रः/ नागेषु इन्द्रः।
हुतभुक्	-	हुतं भुङ्क्ते इति।
समदः	-	मदेन सह वर्तत इति।
गोगर्दभौ	-	गौश्च गर्दभश्च।
शास्त्रविहितं	-	शास्त्रेषु विहितम्।
मन्त्रप्रयोगैः	-	मन्त्र्यते मन्त्रयते गुप्तं भाषते इति मन्त्रः, तेषां प्रयोगैः।

अन्वयः	**अन्वयार्थः**
हुतभुक्	अग्निः
जलेन	वारिणा
सूर्यातपः	सूर्यप्रकाशः
छत्रेण	आतपत्रेण
समदः	मदयुक्तः
नागेन्द्रः	गजेन्द्रः
निशिताङ्कुशेन	तीक्ष्णेन अङ्कुशेन

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

गोगर्दभौ	धेनुः रासभः च
दण्डेन	यष्ट्या
व्याधिः	रोगः
विविधैः भेषजसंग्रहैः	बहुविधैः औषधैः
विषम्	गरलम्
मन्त्रप्रयोगैः	वैद्यैः सह गुप्तपरिभाषणैः
वारयितुं शक्यः।	निरोद्धुं योग्यः।
सर्वस्य शास्त्रविहितम्	सर्वकार्यस्य शास्त्रनिर्दिष्टम्
औषधम् अस्ति।	भेषजं वर्तते।
मूर्खस्य	क्षुद्रस्य/खलस्य/मूढस्य
औषधं नास्ति ।	दोषनिवारणोपायः न वर्तते।

भावार्थः

लोके अग्निः जलेन, सूर्यप्रकाशः आतपत्रेण, मदगजः अङ्कुशेन, गोगर्दभौ यष्ट्या, आमयः औषधैः, विषं मनोधैर्यवर्धकप्रयोगैः गुप्तपरिभाषणैः औषधैः च दूरीकर्तुं शक्यते । एवं सर्वस्यापि दोषस्य शास्त्रनिर्दिष्टाः प्रतिविधयः सन्ति । किन्तु मूर्खस्य दोषनिवारणाय यत्र कुत्रापि औषधं नास्ति एव।

कोशः

आतपः	-	प्रकाशो द्योत आतपः।
हुतभुक्	-	हिरण्यरेता हुतभुक् गहनो हव्यवाहनः।
छत्रम्	-	छत्रं त्वातपत्रम् ।
नागः	-	मतङ्गजो गजो नागकुञ्जरो वारणः करी।
गर्दभः	-	रासभा गर्दभाः खराः।
व्याधिः	-	रुक्रुजोपतापरोगव्याधिगदामयाः ।
भेषजः	-	भेषजौषधभैषज्यान्यगदो जायुरित्यपि।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

मूर्खः - अज्ञे मूढयथाजातमूर्खवैधेयबालिशाः ।

कदर्ये कृपणः क्षुद्रकिंपचानमितंपचाः ।

पठनप्रवर्तनानि।

सुभाषितानि एकैकशः सङ्घशः च विविधया रीत्या आलपतु।

श्रद्धेयाः अंशाः

पदच्छेदः।

पदार्थज्ञानम् ।

अक्षरस्फुटता ।

उचिततालः।

पठितानां श्लोकानां गद्यक्रमं लिखतु।

श्रद्धेयाः अंशाः

अन्वयक्रमः ।

आशयक्रमीकरणम् ।

संग्रहः।

निर्दिष्टाशययुक्तं श्लोकं पाठभागात् निर्धार्य लिखतु।

अ) सज्जनाः कृतमुपकारं कदापि न विस्मरन्ति।

आ) सज्जनानां कथितं द्विरुक्तं न भवति।

इ) बलवान् शक्तियुक्ते पुरुषे एव पराक्रमं प्रकटयति।

ई) मूर्खस्य दोषनिवारणाय औषधं नास्ति।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

श्रद्धेयाः अंशाः

आशयावगमनः।

श्लोकनिर्धारणम्।

लेखनम् ।

पठितानां श्लोकानाम् आशययुक्तानि अन्यानि सुभाषितानि समाहृत्य सम्पुटम् सज्जीकरोतु। कक्ष्यायाम् अवतारयतु ।

श्रद्धेयाः अंशाः

आमुखम्।

आशयपूर्णता।

औचित्यम्।

क्रियापदपरिचयः।

डुधाञ् धारणपोषणयोः परस्मैपदि विधिलिङ्।

	ए.व	द्वि.व	ब.व
प्र. पु	दध्यात्	दध्याताम्	दध्युः
म.पु	दध्याः	दध्यातम्	दध्यात
उ.पु	दध्याम्	दध्याव	दध्याम।

अधि + इक् स्मरणे परस्मैपदि लट्।

	ए.व	द्वि.व	ब.व
प्र. पु	अध्येति	अधीतः	अधियन्ति /अधीयन्ति ।
म.पु	अध्येषि	अधीथः	अधीथ ।
उ.पु	अध्येमि	अधीवः	अधीमः ।

चाक्रिकारोहणप्रक्रिया - **बुद्धेः महत्त्वप्रतिपादकं किमपि सुभाषितं लिखित्वा अवतारयतु।**

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

पाठः २

प्रलोभनादुत्सर।

आमुखम्

संस्कृतसाहित्ये अतिविपुलत्वेन राजमानं वाङ्मयं भवति कथासाहित्यम्। कथाः विनोददायिकाः, उपदेशात्मिकाः , मनोरञ्जिकाः च भवन्ति। सर्वेभ्यः जनेभ्यः आनन्दं प्रदातुं, तान् सन्मार्गे सञ्चारयितुम् च ईदृश्यः कथाः उपकुर्वन्ति। तादृश्यः अनेकाः कथाः बृहत्कथायां पञ्चतन्त्रे हितोपदेशे च सन्ति। तेषु ग्रन्थेषु प्रसिद्धः भवति नारायणपण्डितस्य हितोपदेशः। विष्णुशर्मणः पञ्चतन्त्रस्य प्रभावः हितोपदेशे द्रष्टुं शक्यते। क्रिस्तोः परं चतुर्दशशतके ग्रन्थोऽयं विरचितः इति गण्यते।

पाटलीपुत्रस्य राज्ञः सुदर्शनस्य पुत्राः विद्याविमुखाः, अनधिगतशास्त्राः च आसन्। अत एव ते असन्मार्गिणः आचारहीनाः च अभवन् । राज्ञः निर्देशानुसारं तान् नीतिशास्त्राभिज्ञान् कर्तुं नारायणपण्डितः हितोपदेशकथाः अशिक्षयत् । तासु कथासु पशु-पक्षिणः कथापात्राणि आसन् । ततः झषबककथा पाठभागत्वेन स्वीकृता।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

भक्षयित्वा बहून्मत्स्यानुत्तमाधममध्यमान्।
अतिलोभाद्बकः पश्चान्मृतः कर्कटकग्रहात्।।

मालवदेशे पद्मगर्भनामधेयं सरः अस्ति। तत्रैको वृद्धो बकः सामर्थ्यहीनः उत्कण्ठाकुलमिवात्मानं स्थितः। स च केनचित्कुलीरेण दृष्टः पृष्टश्च - किमिति भवानाहारत्यागेन तिष्ठति ? बकेनोक्तम् - 'मत्स्याः मम जीवनहेतवः। ते कैवर्तैरागत्य व्यापादयितव्याः इति वार्ता नगरोपान्ते मया श्रुता । अतो वर्तमानाभावादेव अस्मन्मरणमुपस्थितमिति ज्ञात्वा आहारेऽप्यनादरः कृतः'। तच्छ्रुत्वा मत्स्यैरालोचितम्- इह अस्मिन् समये तावदुपकारक एवायं लक्ष्यते। तदयमेव यथाकर्तव्यं पृच्छ्यताम्। तथा चोक्तम् -

उपकर्त्रारिणा सन्धिर्न मित्रेणापकारिणा ।
उपकारापकारौ हि लक्ष्यं लक्षणमेतयोः ।।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

मत्स्याः ऊचुः - 'भो बक! कोऽत्र रक्षणोपायः?' बको ब्रूते – 'रक्षणोपायोऽस्ति। जलाशयान्तराश्रयणम्। तत्राहमेकैकशो युष्मान्नयामि'। मत्स्या आहुः - 'एवमस्तु'। ततोऽसौ बकः तान् मत्स्यानेकैकशो नीत्वा खादति स्म। अनन्तरं कुलीरस्तमुवाच- 'भोः बक ! मामपि तत्र नय'। ततो बकोऽप्यपूर्वकुलीरमांसार्थी सादरं तं स्कन्धमारोप्य नीतवान्। कुलीरः मत्स्यकण्टकाकीर्णं तत्स्थलमालोक्य अचिन्तयत् - हा! हतोऽस्मि मन्दभाग्यः। भवतु इदानीं समयोचितं व्यवहरिष्यामि इत्यालोच्य कुलीरस्तस्य ग्रीवां चिच्छेद। स बकः पञ्चत्वं गतः । यः बहुवारम् अन्यान् वञ्चयति सः एकस्मिन् दिने गृह्यते।

विश्वासो नैव कर्तव्यो मधुरासु खलोक्तिषु।
स्मर मूषकमार्जारझषबककथास्तथा।।

पदच्छेदः

उपकर्त्रारिणा	-	उपकर्त्रा + अरिणा ।
पश्चान्मृतः	-	पश्चात् + मृतः ।
तत्रैकः	-	तत्र + एकः ।
बकेनोक्तम्	-	बकेन + उक्तम् ।
कैवर्तैरागत्य	-	कैवर्तैः + आगत्य ।
आहारेऽप्यनादरः	-	आहारे + अपि + अनादरः ।
मत्स्यैरालोचितम्	-	मत्स्यैः + आलोचितम् ।
तत्राहमेकैकशः	-	तत्र + अहम् + एकैकशः ।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

ततोऽसौ - ततः + असौ ।
कुलीरस्तमुवाच - कुलीरः + तम् उवाच ।
बकोऽप्यपूर्वकुलीरमांसार्थी - बकः + अपि + अपूर्वकुलीरमांसार्थी।

विग्रहः

हितोपदेशः - हितानां उपदेशः इति हितोपदेशः।
कण्टकाकीर्णः - कण्टकैः आकीर्णः ।
जलाशयान्तरम् - अन्यः जलाशयः, तम् ।

धातुपरिचयः

पृच्छ्यताम् - प्रच्छि ज्ञीप्सायां कर्मणि आत्मनेपदी.लोट् प्र. पु. ए. व ।
ऊचुः - ब्रूञ् व्यक्तायां वाचि परस्मैपदी. लिट् प्र. पु. ब. व ।
ब्रूते - ब्रूञ् व्यक्तायां वाचि आत्मनेपदी. लट् प्र. पु. ए. व ।
चिच्छेद - छिदिर् द्वैतीभावे परस्मैपदी. लिट् प्र. पु. ए. व ।

कोशः

झषः - पृथुरोमा झषो मत्स्यो मीनो वैसारिणोऽण्डजः। इत्यमरः ।

संस्कृतकथासाहित्यम्

ग्रन्थः	कर्ता
बृहत्कथा	गुणाढ्यः
बृहत्कथामञ्जरी	क्षेमेन्द्रः
कथासरित्सागरः	सोमदेवः
वेतालपञ्चविंशतिः	शिवदासपण्डितः
शुकसप्ततिः	चिन्तामणिः(श्वेताम्बरजैनः)
पञ्चतन्त्रम्	विष्णुशर्मा
हितोपदेशः	नारायणपण्डितः
जातकमाला	आर्यशूरः

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

पठनप्रवर्तनानि।

कथाभागं भावानुसारम् अवतारयतु।

श्रद्धेयाः अंशाः

आशयावगमः।

आशयव्यक्तता ।

शैली।

कथायाः सारांशं संगृह्य लिखतु।

श्रद्धेयाः अंशाः

आशयावगमः।

संग्रहसामर्थ्यम्।

आशयव्यक्तता।

कथास्तम्भं क्रमीकरोतु।

- खलोक्तिषु विश्वासो नैव कर्तव्यः।
- मालवदेशे पद्मगर्भनामधेयं सरः अस्ति।
- भो बक! कोऽत्र रक्षणोपायः।
- कुलीरः बकस्य ग्रीवां चिच्छेद।
- बकः अपूर्वकुलीरमांसार्थी तं कुलीरं स्कन्धमारोप्य नीतवान्।

श्रद्धेयाः अंशाः

आशयावगमः।

क्रमीकरणम् ।

कथास्तम्भपूर्तिः।

कथां मातृभाषायाम् अनुवदतु।

श्रद्धेयाः अंशाः

चर्चा ।

आशयक्रोडीकरणम्।

उचितया भाषया लेखनम्।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

बककुलीरयोः सम्भाषणं संभाव्य लिखतु ।

श्रद्धेयाः अंशाः

आशयावगमनः। क्रमीकरणम्। संम्भाषणलेखनम्।

कथां नाटकरूपेण परिवर्त्य अवतारयतु ।

श्रद्धेयाः अंशाः

पात्रानुसारेण वर्गीकरणम्। सम्भाषणपरिशीलनम्।

नाटकावतारणम्।

उदाहरणानुसारं वाक्यं परिवर्त्य लिखतु।

उदा - बकः आहारत्यागेन **तिष्ठति**। बकः आहारत्यागेन **अतिष्ठत्।**

बालिका पुस्तकं **पठति।** ....

गायकः मधुरं **गायति।** ....

बालः गृहाद्बहिः **क्रीडति।** ....

अधिकविस्तरः

भक्षयित्वा बहून्मत्स्यानुत्तमाधममध्यमान्।
अतिलोभाद्बकः पश्चान्मृतः कर्कटकग्रहात्।।

अन्वयः- उत्तमाधममध्यमान् बहून् मत्स्यान् भक्षयित्वा पश्चात् अतिलोभात् बकः कर्कटकग्रहात् मृतः।

आशयः विविधान् मत्स्यान् भक्षयित्वा अतिमोहात् बकः कुलीरग्रहात् मृतः।

उपकर्त्रारिणा सन्धिर्न मित्रेणापकारिणा ।
उपकारापकारौ हि लक्ष्यं लक्षणमेतयोः ।।

अन्वयः उपकर्त्रारिणा (सह) सन्धिः (कार्या) अपकारिणा मित्रेण (सह) सन्धिः न (कार्या)। हि एतयोः लक्ष्यं लक्षणं च उपकारापकारौ (भवतः)।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

आशयः उपकारं कुर्वता शत्रुणा सह सन्धिः कार्या। अपकारिणा मित्रेण सह सन्धिः न कार्या। यतः एतयोः शत्रुमित्रयोः अपकार -उपकारौ लक्षणे भवतः। शत्रोः लक्षणम् अपकारः एवं मित्रस्य लक्षणम् उपकारश्च। अपकाररूपे लक्षणे लक्ष्यं शत्रुर्भवति। उपकाररूपे तु लक्ष्यं मित्रमेव।

विश्वासो नैव कर्तव्यो मधुरासु खलोक्तिषु।
स्मर मूषकमार्जारझषबककथास्तथा।।

अन्वयः - मधुरासु खलोक्तिषु विश्वासः नैव कर्तव्यः। तथा मूषकमार्जार झषबककथाः स्मर।

आशयः- खलानां (दुष्टानां) मधुरवचनेषु विश्वासः न करणीयः। मूषक-मार्जार- मत्स्यकथाः स्मरणीया एव।

क्रियापदपरिचयः।

प्रच्छि ज्ञीप्सायां लोट् परस्मैपदी ।

	ए.व	द्वि.व	ब.व
प्र. पु	पृच्छतु-पृच्छतात्	पृच्छताम्	पृच्छन्तु
म.पु	पृच्छ-पृच्छतात्	पृच्छतम्	पृच्छत
उ.पु	पृच्छानि	पृच्छाव	पृच्छाम ।

ब्रूञ् व्यक्तायां वाचि लिट् परस्मैपदी ।

	ए.व	द्वि.व	ब.व
प्र. पु	उवाच	ऊचतुः	ऊचुः
म.पु	उवचिथ-उवक्थ	ऊचथुः	ऊच
उ.पु	उवाच-उवच	ऊचिव	ऊचिम।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

ब्रूञ् व्यक्तायां वाचि लट् आत्मनेपदी ।

	ए.व	द्वि.व	ब.व
प्र. पु	ब्रूते	ब्रुवाते	ब्रुवते
म.पु	ब्रूषे	ब्रुवाथे	ब्रूध्वे
उ.पु	ब्रूवे	ब्रूवहे	ब्रूमहे।

छिदिर् द्वैतीभावे लिट् परस्मैपदी ।

	ए.व	द्वि.व	ब.व
प्र. पु	चिच्छेद	चिच्छिदतुः	चिच्छिदुः
म.पु	चिच्छेदिथ	चिच्छिदथुः	चिच्छिद
उ.पु	चिच्छेद	चिच्छिदिव	चिच्छिदिम।

चाक्रिकारोहणप्रक्रिया –

उपदेशात्मिकां काञ्चित् इतिहासकथां लिखित्वा अवतारयतु।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



पाठः ३

श्रियो मूलमनिर्वेदः

आमुखम्

आदिकविः वाल्मीकिः, आदिकाव्यं रामायणम् इति च सुविदितम् । रामायणमेव आदिकाव्यमिति विद्वत्सम्मतम् । काव्यमिदं सकलवागर्थमकुटमणिरिव भासते नित्यम् ।

रावणापहृतां सीतामन्विष्य लङ्कामुपगतः हनूमान् अन्तःपुरे जनपदे च ताम् अदृष्ट्वा प्रथमं निराशोऽभवत्। यदि हनुमान् विना सीतावृत्तान्तं प्रतिनिवर्तते तर्हि निन्दापात्रतामेति इति विचिन्तयति। तथा अनिर्वेदकृतं कर्म एव फलमाप्नुयात् इति मत्वा वर्धितात्मवीर्यः सः सीतान्वेषणं पुनरारब्धुं निश्चिकाय। सुन्दरकाण्डात् सः सन्दर्भः पाठभागे स्वीकृतः।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

१ स तस्य मध्ये भवनस्य मारुति-
र्लतागृहांश्चित्रगृहान्निशागृहान् ।
जगाम सीतां प्रति दर्शनोत्सुको
न चैव तां पश्यति चारुदर्शनाम् ।।

पदच्छेदः

स तस्य - सः + तस्य ।
मारुतिर्लतागृहांश्चित्रगृहान्निशागृहान् - मारुतिः + लतागृहान् + चित्रगृहान् + निशागृहान् ।
चैव - च + एव।

विग्रहः

मारुतिः - मरुतः अपत्यं पुमान् ।
चारुदर्शनाम् - चारु दृश्यते या सा ताम्।
दर्शनोत्सुकः - दर्शने उत्सुकः ।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

अन्वयः	अन्वयार्थः
मारुतिः	हनुमान्
तस्य	रावणस्य
भवनस्य मध्ये	प्रासादस्य मध्ये
लतागृहान्	लतानिकुञ्जान्
चित्रगृहान्	विविधवर्णलिप्तान् निलयान्
निशागृहान् प्रति	रात्रिवसतीः लक्ष्यीकृत्य
जगाम।	ययौ।
सीतां	मैथिलीं
प्रतिदर्शनोत्सुकः	प्रत्यवलोकनतत्परः
सः	हनुमान्
चारुदर्शनां	मनोहररूपां(सुन्दरीं)
ताम् एव च	सीताम् एव च
न पश्यति ।	न अवलोकयति ।

भावार्थः

वायुपुत्रः हनुमान् रावणभवनानां मध्ये लतानिकुञ्जान् विचित्ररूपान् गृहान् तथा निशागृहान् च जगाम। सीतादर्शनव्यग्रः सः मनोहररूपां तामेव न अपश्यत् ।

कोशः

गृहम् - 'गृहं गेहोऽथवसतिर्वेश्मसद्मनिकेतनम्' इत्यमरः।

क्रियापदानि।

'जगाम'- गम्लृ गतौ धातु लिट् परस्मैपदि ।

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्र-पु	जगाम	जग्मतुः	जग्मुः
म-पु	जगमिथ- जगन्थ	जग्मथुः	जग्म
उ-पु	जगाम - जगम	जग्मिव	जग्मिम।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

२ स चिन्तयामास ततो महाकपिः
प्रियामपश्यन् रघुनन्दनस्य ताम्।
ध्रुवं हि सीता म्रियते यथा न मे
विचिन्वतो दर्शनमेति मैथिली।।

पदच्छेदः

स चिन्तयामास	-	सः + चिन्तयामास ।
ततो महाकपिः	-	ततः + महाकपिः ।
विचिन्वतो दर्शनमेति।	-	विचिन्वतः + दर्शनम् + एति ।

विग्रहः

महाकपिः	-	महान् चासौ कपिश्च।
रघुनन्दनस्य	-	रघूणां नन्दनः तस्य ।
मैथिली	-	मिथिलायाः राजा मैथिलः, मैथिलस्य अपत्यं स्त्री।

अन्वयः	**अन्वयार्थः**
रघुनन्दनस्य	श्रीरामचन्द्रस्य
प्रियां तां	कान्तां तां (सीतां)
अपश्यन्	न पश्यन् (अदृष्ट्वा)
सः महाकपिः	स वानरवीरः
ततः	तदनन्तरम्
चिन्तयामास	(एवम्) अचिन्तयत् ।
विचिन्वतः	अन्वेषणं कुर्वतः
मे दर्शनं	मम दृष्टिपथं
मैथिली	सीता
न एति ।	न प्राप्नोति ।
यथा	येन केनापि प्रकारेण

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

सीता	सीतादेवी (सा)
म्रियते	मरणं प्राप्नोति।
ध्रुवं हि (इति)।	इति (मया) सन्दिह्यते ।

भावार्थः

स वानरसत्तमः सीतां मार्गमाणः तामदृष्ट्वा रामभामिनी सा कदाचित् मृता भवेदिति (मृतिम् उपगम्यत इति) अचिन्तयत्।

कोशः

वानरः - ' कपिप्लवङ्गप्लवगशाखामृगवलीमुखाः ' ।

धातुरूपाणि

म्रियते - मृङ् प्राणत्यागे कर्तरि लटि प्र. पु. ए. व.।

अपश्यन् - नञ् पूर्वक दृशिर् धातोः शत्रन्तं प्र. ए. व ।

विचिन्वतः - वि पूर्वक चिनु धातोः शत्रन्तं षष्ठी ए. व ।

३ सा राक्षसानां प्रवरेण जानकी
स्वशीलसंरक्षणतत्परा सती।
अनेन नूनं प्रतिदुष्टकर्मणा
हता भवेदार्यपथे परे स्थिता।।

पदच्छेदः

भवेदार्यपथे - भवेत् + आर्यपथे ।

विग्रहः

स्वशीलसंरक्षणतत्परा - स्वस्य शीलं स्वशीलम्, तस्य संरक्षणं स्वशीलसंरक्षणम्, तस्मिन् तत्परा।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

जानकी - जनकस्य अपत्यं स्त्री ।

प्रतिदुष्टकर्मणा - दुष्टं कर्म दुष्टकर्म दुष्टकर्मणि इति प्रतिदुष्टकर्म, तेन।

आर्यपथे - आर्याणां पन्था आर्यपथः, तस्मिन् ।

अन्वयः	अन्वयार्थः
परे	महति
आर्यपथे	श्रेष्ठमार्गे
स्थिता	वर्तमाना
स्वशीलसंरक्षणतत्परा	स्वपतिव्रतात्वसंरक्षणोत्सुका
सती	पतिव्रता
सा जानकी	सीता
प्रतिदुष्टकर्मणा	हीनकर्मणा
अनेन	एतेन
राक्षसानां प्रवरेण	राक्षसराजेन(रावणेन)
नूनं	निश्चयं
हता	मारिता
भवेत् (इति चिन्तयामास) ।	स्यात् (इति अचिन्तयत्) ।

भावार्थः

सन्मार्गे तिष्ठन्ती स्वपातिव्रत्यरक्षणोत्सुका सती सा सीता निष्ठुरप्रतिकारेच्छुना रावणेन नूनं विपन्ना भवेत् इति हनुमान् शशङ्के ।

कोशः

राक्षसः - 'राक्षसः कौणपः क्रव्यात् क्रव्यादोऽसृक्च आशरः' इत्यमरः।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

धातुरूपाणि

भवेत् - भू सत्तायाम् - परस्मैपदि विधिलिङ् प्र. पु. ए. व ।
भवेत् - भवेतां - भवेयुः।

प्रयोगविशेषः

- सा राक्षसानां प्रवरेण हता। (कर्मणि)
  तां राक्षसानां प्रवरः हतवान् । (कर्तरि)
- नूनम् इत्यवधारणे।

४ विरूपरूपा विकृता विवर्चसो
महानना दीर्घविरूपदर्शनाः।
समीक्ष्य सा राक्षसराजयोषितो
भयाद्विनष्टा जनकेश्वरात्मजा।।

पदच्छेदः

विरूपरूपा विकृता विवर्चसो महानना दीर्घविरूपदर्शनाः – विरूपरूपाः + विकृताः + विवर्चसः + महाननाः + दीर्घविरूपदर्शनाः ।

राक्षसराजयोषितो भयाद्विनष्टा - राक्षसराजयोषितः + भयात् + विनष्टा ।

विग्रहः

विरूपरूपाः - विगतं रूपं यस्मात् तत् विरूपं, विरूपं रूपं यासां ताः।

महाननाः - महान्ति आननानि यासां ताः ।

दीर्घविरूपदर्शनाः - दीर्घे विरूपे च दर्शने यासां ताः।

राक्षसराजयोषितः - राक्षसानां राजा राक्षसराजः, तस्य योषितः।

जनकेश्वरात्मजा - जनकेश्वरस्य आत्मजा ।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

अन्वयः	अन्वयार्थः
विरूपरूपाः	विरूपाः
विकृतः	विकलरूपाः
विवर्चसः	तेजोहीनाः
महाननाः	बृहन्मुखीः
दीर्घविरूपदर्शनाः	प्रांशुविकृतरूपिणीः
राक्षसराजयोषितः	रावणपरिचारिकाः
समीक्ष्य	अवलोक्य
जनकेश्वरात्मजा	जानकी
भयात्	भीत्या
विनष्टा(भवेत् इति चिन्तयामास)।	विपन्ना (इति अमन्यत) ।

भावार्थः

विरूपिणीः विकृताः लावण्यरहिताः (तेजोहीनाः) महाशिरस्काः(महावक्त्राः) दुर्दर्शनाः (दुर्निरीक्ष्याः) च दशाननपरिचारिकाः दृष्ट्वा जनकात्मजा सीता भीत्या मृता भवेत् इति हनुमान् चिन्तयामास ।

कोशः

आननम् - ‘ वक्त्रास्ये वदनं तुण्डमाननं लपनं मुखम्’ इत्यमरः।

५ **सीतामदृष्ट्वा ह्यनवाप्य पौरुषं**
विहत्य कालं सह वानरैश्चिरम्।
न मेऽस्ति सुग्रीवसमीपगा गतिः
सुतीक्ष्णदण्डो बलवांश्च वानरः।।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

पदच्छेदः

ह्यनवाप्य	-	हि	+	अनवाप्य ।
वानरैश्चिरम्	-	वानरैः	+	चिरम्।
मेऽस्ति	-	मे	+	अस्ति।
सुतीक्ष्णदण्डो बलवांश्च	-	सुतीक्ष्णदण्डः	+	बलवान् + च।

विग्रहः

अनवाप्य	-	न अवाप्य।
पौरुषम्	-	पुरुषस्य भावः।
बलवान्	-	बलम् अस्य अस्तीति ।
सुग्रीवसमीपगा	-	सुग्रीवस्य समीपं गच्छति या सा ।
सुतीक्ष्णदण्डः	-	सुतीक्ष्णः दण्डः यस्य सः।

अन्वयः	**अन्वयार्थः**
चिरं कालम्	बहुकालम्
वानरैः सह	कपिभिः समम्
विहृत्य	विहारं कृत्वा
सीतां	जानकीं
अदृष्ट्वा	न पश्यन्
पौरुषं	पुरुषोचितं तेजः
अनवाप्य	अप्राप्य
मे	मम(हनुमतः)
सुग्रीवसमीपगा गतिः	सुग्रीवसकाशप्राप्तिः
न	नैव
अस्ति	भवति ।
हि	निश्चयेन (यतः)

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

वानरः	सुग्रीवः
सुतीक्ष्णदण्डः	तीक्ष्णदण्डप्रदः
बलवान् च ।	बलशाली च ।

भावार्थः

वानरैः साकं बहुकालं व्यतीत्य सीताम् अनवलोक्य न्यस्तकर्मणि फलम् अलब्ध्वा यदि प्रतिनिवर्तनं मे न शक्यम्। यतः सुग्रीवः कठिनदण्डः शक्तिशाली च भवति।

कोशः

पौरुषम् - 'पुंभावे तत्क्रियायां च पौरुषम् ' इत्यमरः।

व्याकरणविशेषः

"सहयुक्तेऽप्रधाने" इति सूत्रेण समं साकं सार्धं सह इत्यादीनां शब्दानां योगे तृतीया विभक्तिः स्यात् । **वानरैः** सह इत्यत्र सहशब्दयोगे **वानरैः** इति तृतीया ।

६ **दृष्टमन्तःपुरं सर्वं**
दृष्टा रावणयोषितः।
न सीता दृश्यते साध्वी
वृथा जातो मम श्रमः।।

पदच्छेदः

दृष्टा रावणयोषितः - दृष्टाः + रावणयोषितः।
जातो मम - जातः + मम।

विग्रहः

रावणयोषितः - रावणस्य योषितः।

अन्वयः	**अन्वयार्थः**
अन्तःपुरम्	राजस्त्रीणां वासस्थानं /राजनारीगृहम्
सर्वम्	समस्तम्(सम्पूर्ण)

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

दृष्टम्	अवलोकितम्
रावणयोषितः	दशाननस्य वध्वः
दृष्टाः	अवलोकिताः
साध्वी	पतिव्रता
सीता	जानकी
न	नैव
दृश्यते ।	अवलोक्यते ।
मम	मम(हनुमतः)
श्रमः	प्रयत्नः
वृथा	व्यर्थः
जातः ।	अभवत् ।

भावार्थः

लङ्कायां राजान्तःपुरं सर्वं तथा रावणस्त्रियः सर्वाः अपि मया दृष्टाः । किन्तु सुशीला मैथिली एव न दृष्टा इत्यतः मम प्रयत्नः विफलः संजातः।

कोशः

योषित् - 'स्त्री योषिदबला योषा नारी सीमन्तिनी वधूः' इत्यमरः.।

धातुरूपाणि

दृश्यते - दृशिर् प्रेक्षणे धातोः कर्मणि लटि प्र.पु.ए.व। कर्तरि पश्यति।

७ किं वा वक्ष्यति वृद्धश्च
जाम्बवानङ्गदश्च सः।
गतं पारं समुद्रस्य
वानराश्च समागताः।।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

पदच्छेदः

वृद्धश्च	-	वृद्धः + च।
जाम्बवानङ्गदश्च	-	जाम्बवान् अङ्गदः + च।
वानराश्च	-	वानराः + च।

अन्वयः	अन्वयार्थः
समुद्रस्य	सागरस्य
पारं	अपरं तीरं
गतं (मां)	प्रतिनिवृत्तं मां
समागताः	आगताः
वानराः च	कपयः(च)
सः अङ्गदः च	(मम सुहृद्) अङ्गदः च
वृद्धः	प्राज्ञः
जाम्बवान् च	जाम्बवान् च
किं वा	किम् वा
वक्ष्यति ?	कथयिष्यति? (निन्दापूर्वम्)

भावार्थः

सीतामदृष्ट्वा प्रतिगच्छन्तं मां समुद्रतीरे स्थिताः सर्वे वानराः अङ्गदः वृद्धो(परिणतप्रज्ञः)जाम्बवान् च संभूय वा किं वक्ष्यन्ति? परिहासेन किं किं न कथयिष्यन्ति? इति हनुमान् चिन्तयति।

कोशः

समुद्रः - समुद्रोऽब्धिरकूपारः पारावारस्सरित्पतिः ।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

८ अनिर्वेदः श्रियो मूल-
मनिर्वेदः परं सुखम्।
अनिर्वेदो हि सततं
सर्वार्थेषु प्रवर्तकः।।

पदच्छेदः

श्रियो मूलमनिर्वेदः	-	श्रियः + मूलम् अनिर्वेदः।
अनिर्वेदो हि	-	अनिर्वेदः + हि।

विग्रहः

अनिर्वेदः	-	न निर्वेदः।
प्रवर्तकः	-	प्रवर्तयति इति।
सर्वार्थेषु	-	सर्वेषु अर्थेषु ।

अन्वयः	अन्वयार्थः
अनिर्वेदः	स्वावमानराहित्यम् (जागरूकता)
श्रियः	ऐश्वर्यस्य
मूलम्	निदानम्
अनिर्वेदः	जागरूकता
परं	सर्वोत्कृष्टम्
सुखम्	सुखम्
सततं	सर्वदा
सर्वार्थेषु	सर्वपुरुषार्थेषु
प्रवर्तकः	नियोजकः
अनिर्वेदः हि।	अविरामप्रयत्नः एव(भवति)।

भावार्थः

निराशारहितः (निस्तन्द्रः/अक्षीणः) प्रयत्नः एव सम्पदां सुखस्य च कारणम्। तथा

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

सर्वार्थेषु प्रयोजकः (प्रवर्तकः) च भवति अविरामप्रयत्नः। अर्थात् सीतादर्शनपर्यन्तं यत्नः करणीयः इति हनूमान् चिन्तयति।

कोशः

सुखम् - स्यादानन्दथुरानन्द शर्मशातसुखानि च। (अमरकोशः)



९ करोति सफलं जन्तोः
कर्म यत्तत् करोति सः।
तस्मादनिर्वेदकृतं
यत्नं चेष्टेऽहमुत्तमम्।।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

पदच्छेदः

यत्तत्	-	यत् + तत्।
चेष्टेऽहमुत्तमम्	-	चेष्टे + अहम् उत्तमम्।

विग्रहः

सफलम्	-	फलेन सह वर्तते यस्मिन् कर्मणि इति।
अनिर्वेदकृतम्	-	न निर्वेदः अनिर्वेदः , तेन कृतम्।

अन्वयः	अन्वयार्थः
जन्तोः	प्राणिनः
कर्म	प्रयत्नः
यत्	यादृशम्
कर्म	प्रवर्तनम्
सफलं करोति।	फलपूर्णं कल्पयति।
सः	देही
तत्	तादृशं कर्म
करोति	आचरति
तस्मात्	तस्मात्कारणात्
अहम्	हनुमान्
अनिर्वेदकृतम्	अविरामपूर्वम् (सोत्साहम्)
उत्तमम्	महनीयम्
यत्नम्	कर्म
चेष्टे ।	करोमि ।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

भावार्थः

येन कर्मणा जनैः साफल्यम् अवाप्यते तदेव कर्म ते आचरन्ति। अतः अहं (हनुमान्) निराशारहितं सोत्साहं प्रयत्नं कर्तुम् इच्छामि। (अर्थात् पुनरपि प्रत्याशापूर्वं सीतान्वेषणं करोमि इति)

कोशः

जन्तुः - प्राणी तु चेतनो जन्मी जन्तुजन्युशरीरिणः' इत्यमरः।

धातुरूपाणि

चेष्टे - चेष्ट चेष्टायाम् आत्मनेपदी लट् उ. पु. ए. व ।

रूपाणि - चेष्टे - चेष्टावहे - चेष्टामहे । (प्र.पु. ए. व. चेष्टते)

१० इति सञ्चिन्त्य ववृधे
विचेतुमुपचक्रमे।
भूयश्चापि विचेष्यामि
न यत्र विचयः कृतः ।।

पदच्छेदः

भूयश्चापि - भूयः + च + अपि।

अन्वयः	अन्वयार्थः
यत्र	यस्मिन् भागे
विचयः	अन्वेषणम्
न कृतः (तत्र)	न अनुष्ठितः (तत्र)
विचेष्यामि	अन्विष्यामि
इति	इत्येवम्
सञ्चिन्त्य	विचिन्त्य
ववृधे।	प्रवृद्धः अभवत् ।(मनसा शरीरेण च वर्धितः इत्याशयः)

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

अपि च	तथैव
भूयः	पुनः पुनः (सम्यक्)
विचेतुम्	अन्वेष्टुम्
उपचक्रमे ।	आरेभे।

भावार्थः

पूर्वोक्तप्रकारेण सम्यक् विचार्य इतः पर्यन्तं यत्र यत्र न अन्वेषणं कृतं तत्र तत्र सविस्तरम् अन्वेष्यामि इति निश्चित्य स हनुमान् मनसा शरीरेण च वर्द्धितवीर्यः पुनः विचयनं कर्तुं समारेभे।

कोशः

भूयः - 'मुहुर्भूयः पुनः शश्वदभीक्ष्णमसकृत्समाः' इत्यमरः।

धातुरूपाणि

वव‍ृधे - वृधु वृद्धौ धातोः लिट् आत्मनेपदि प्र. पु. ए. व।

विचेष्यामि - वि उपसर्ग चिङ् चयने धातोः लृट् परस्मैपदि उ. पु. ए. व।

उपचक्रमे - उपपूर्वक क्रमुधातोः 'प्रोपाभ्यां समर्थाभ्याम्' इति सूत्रेण आत्मनेपदित्वम् लिट् प्र. पु. ए. व।

पठनप्रवर्तनानि।

श्लोकान् सतालम् आलपतु ।

श्रद्धेयाः अंशाः

उचितः तालः।

भावात्मकता।

शुद्धोच्चारणम्।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

श्लोकानाम् आशयं संगृह्य वदतु लिखतु ।

श्रद्धेयाः अंशाः

आशयपूर्तिः।

भाषाशुद्धिः।

संक्षेपस्य औचित्यम्।

जीवितविजयाय प्रेरणादायकानि सुभाषितानि सञ्चित्य लिखतु।

श्रद्धेयाः अंशाः

विषयानुबन्धित्वम्।

आशयावगतिः।

वैविध्यम्।

भवताम् इष्टतमं श्लोकं सञ्चित्य आस्वादनटिप्पणीं लिखतु।

श्रद्धेयाः अंशाः

उचितश्लोकस्वीकारः।

आशयपूर्णता।

भाषाप्रयोगः।

'जीवने यदा निराशा बाधते तदा अतिजीवनम् अनिवार्यमेव।' **विषयेऽस्मिन् पाठभागस्य प्रसक्तिमधिकृत्य चर्चां कृत्वा टिप्पणीं लिखतु ।**

श्रद्धेयाः अंशाः

आशयपूर्णता।

भाषाप्रयोगः।

भागभागित्वम्।

शब्दकोशः

संस्कृतम्	संस्कृतम्	कैरली	कन्नटम्	आङ्गलेयम्
अनधिगतशास्त्राः	अशिक्षितशास्त्राः	ശാസ്ത്രം പഠിക്കാത്തവർ	ಶಾಸ್ತ್ರ ಕಲಿಯದವನು	Who didn't studied sciences

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

अनवाप्य	अप्राप्य	ലഭിക്കാതിരുന്നിട്ട്	ಸಿಗದೇ	Having not attained
अनिर्वेदः	अनालस्यम्।	ഉത്സാഹത്തോടുകൂടിയ ശ്രദ്ധ	ಆಲಸ್ಯವಿಲ್ಲದೆ	Vigilance
अभिज्ञान्	पण्डितान्	പണ്ഡിതന്മാരെ	ಪಂಡಿತರನ್ನು	Scholars
अमृतकल्पम्	अमृततुल्यम्	അമൃതതുല്യം	ಅಮೃತಸಮಾನವಾದ	Equal to nectar
अरिः	शत्रुः	ശത്രു	ಶತ್ರು	Enemy
असन्मार्गिणः	दुर्मार्गिणः	ദുഃസ്വഭാവമുള്ളവർ	ಕೆಟ್ಟಸ್ವಭಾವವಿರುವವರು	Ill-natured
आजीवनान्तम्	आमरणात्	ജീവിതാവസാനം വരെ	ಕೊನೆಯವರೆಗೆ	Till teath
आलोक्य	विलोक्य	കണ്ടിട്ട്	ನೋಡಿ	Having beheld
उक्तिः	वचनम्	വാക്ക്	ಮಾತು	saying
उत्कण्ठाकुलः	व्याकुलः	വിഷമിച്ച	ವ್ಯಾಕುಲನಾದ	Agitated
एकैकशः	एकैकम्	ഒരോരുത്തരെയായി	ಒಬ್ಬೊಬ್ಬರಾಗಿ	One by One
कुचेली	कुत्सित-वस्त्रधारी	ജീർണ്ണ വസ്ത്രധാരി	ಮಲಿನವಸ್ತ್ರಧ-ರಿಸಿದವನು	Wearing dairty cloths
कुलीरः	कर्कटः	ഞണ്ട്	ಏಡಿ	Crab
कैवर्तः	धीवरः	മുക്കുവൻ	ಬೆಸ್ತ	Fisher Man
खलः	दुष्टः	ദുഷ്ടൻ	ದುಷ್ಟ	Cruel
गर्दभः	रासभः	കഴുത	ಕತ್ತೆ	Donkey
ग्रीवा	गलः	കഴുത്ത്	ಗಂಟಲು	Neck
चक्रपाणिः	विष्णुः	വിഷ്ണു	ವಿಷ್ಣು	Vishnu
चिच्छेद	अकर्तयत्	മുറിച്ചു,	ಮುರಿದನು	Cut
चित्रगृहम्	चित्रैरलंकृतं भवनम्।	നിറങ്ങൾ കൊണ്ട് മോടിപിടിപ്പിച്ച വീട്	ಬಣ್ಣಹಚ್ಚಿದ	Residence ornated by diferance Clours
चेष्टे	कुर्वे	ചെയ്യുന്നു	ಮಾಡುವೆ	I do
जीवनहेतवः	जीवनाधाराः	ജീവൻ നിലനിർത്തുന്നവ	ಜೀವನಕಾಯುವವರು	Bearing life
झषः	मत्स्यः	മത്സ്യം	ಮೀನು	Fish

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

तृणम्	शष्पम्	പുല്ല്	ಹುಲ್ಲು	Grass
नगरोपान्ते	नगरसमीपे	നഗരസമീപത്ത്	ನಗರದಸಮೀಪ	Near the city
नागेन्द्रः	गजश्रेष्ठः	ഗജശ്രേഷ്ഠൻ	ಆನೆ	A lofty elephant
निशागृहम्	रात्रिगृहम्	രാത്രിഗൃഹം	ರಾತ್ರಿಗೃಹ	Nite residence
निशिताङ्कुशः	तीक्ष्णः अङ्कुशः	മൂർച്ചയേറിയ തോട്ടി	ಅಂಕುಶ	Severe Goad
निहितभाराः	धृतभाराः	ഭാരം വഹിച്ചവ	ಹೊರುವವರು	Bearing Weights
पञ्चत्वम्	मरणम्	മരണം	ಮರಣ	Death
पारम्	परतीरम्	മറുകര	ಆಚೆಯತೀರ	The other bank
प्रणतम्	विनतम्	നന്നായിതലകുനിച്ച	ವಿನಮ್ರ	With bowed head
प्रभञ्जनः	महावातः	കൊടുങ്കാറ്റ്	ಬಿರುಗಾಳಿ	Storm
बकः	कह्वः	കൊക്ക്	ಕೊಕ್ಕರೆ	Crane
बह्वाशी	अमितभोजी	അമിതാഹാരി	ಹೆಚ್ಚುಆಹಾರಸೇವಿಸುವವನು	Eating much
भानुः	सूर्यः	സൂര്യൻ	ಸೂರ್ಯ	Sun
भेषजम्	औषधम्	മരുന്ന്	ಮದ್ದು	Remady/
मत्स्यकण्टकः	मत्स्यास्थि	മുള്ള്	ಮುಳ್ಳು	Fish
महाकपिः	कपिश्रेष्ठः	വാനരവീരൻ	ವಾನರ	A lofty Monkey
महाननाः	विपुलवक्त्राः	വലിയമുഖമുള്ളവർ	ದೊಡ್ಡಮುಖವಿರುವವರು	Having wide Faces
मारुतिः	हनुमान्	ഹനുമാൻ	ಹನುಮಂತ	Hanuman
ववृधे	वृद्धिं प्राप	വളർന്നുവന്നു	ಬೆಳೆದನು	Flourished
वह्निः	अग्निः	അഗ്നി	ಅಗ್ನಿ	Fire
विक्रमः	पराक्रमः	പരാക്രമം	ಪರಾಕ್ರಮ	Valour
विचेतुं	अन्वेष्टुं	അന്വേഷിക്കുന്നതിന്	ಹುಡುಕಲು	To Search
विवर्चसः	तेजोहीनाः	തേജസ് നഷ്ടപ്പെട്ട	ತೇಜಸ್ಸಿಲ್ಲದವರು	Bereft of Glory
श्री	ऐश्वर्यं	ഐശ്വര്യം	ಐಶ್ವರ್ಯ	Wealth
सरः	तटाकः	തടാകം	ತಟಾಕ	Lake
साध्वी	पतिव्रता	പതിവ്രത	ಪತಿವ್ರತೆ	Virtous women
सुतीक्ष्णदण्डः	कर्कशदण्डदाता	കടുത്ത ശിക്ഷനൽകുന്നവർ	ದಂಡಿಸುವವರು	Giving Grave Punishment

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

स्कन्धः	अंसः	ചുമൽ	ಹೆಗಲು	Shoulder
हुतभुक्	अग्निः	അഗ്നി	ಅಗ್ನಿ	Fire

किमधिगतम् ?

निर्देशः - प्रवर्तनानि यथाकालं कृतानि चेत् साधुसूचकचिह्नं (√) क्रियताम्

क्रम-संख्या	प्रवर्तनानि	सम्यक् कृतम्	भागिकतया कृतम्	क्लेशनिर्देशः	परिहारबोधनम् (संख्यया सूचितम्)
१					
२					
३					
४					

१ अध्यापकस्य साहाय्येन । २ सुहृदः साहाय्येन। ३ अन्येषां साहाय्येन।

अभ्यासपत्रिका - १

१) यथौचितं योजयत।

भेषजं	-	नागेन्द्रः।
कर्कटकः	-	सीता।
हितोपदेशः	-	कुलीरः।
मैथिली	-	नारायणपण्डितः।
निशिताङ्कुशः	-	औषधम्।

२) पद्यं पठित्वा उचिताशयं चित्वा लिखत।

तृणानि नोन्मूलयति प्रभञ्जनो
मृदूनि नीचैः प्रणतानि सर्वतः।
समुच्छ्रितानेव तरून् प्रबाधते
महान् महत्येव करोति विक्रमम्।।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

क) मूर्खजनस्य मूर्खतापनयनाय औषधं नास्ति।

ख) सज्जनाः कृतमुपकारं न कदापि विस्मरन्ति।

ग) शक्तियुक्तः शक्तियुक्तेन सह पराक्रमं करोति।

३) श्लोकं पठित्वा प्रश्नानामुत्तराणि लिखत।

सीतामदृष्ट्वा ह्यनवाप्य पौरुषं
विहत्य कालं सह वानरैश्चिरम्।
न मेऽस्ति सुग्रीवसमीपगा गतिः
सुतीक्ष्णदण्डो बलवांश्च वानरः।।

क. सुतीक्ष्णदण्डः कः?

ख. श्लोकात् **क्त्वान्त**मव्ययं चित्वा लिखत।

ग. **बलवांश्च** इति पदस्य पदच्छेदं लिखत।

घ. सीतामदृष्ट्वा हनुमतः कीदृशी गतिः नास्ति?

ङ. **पुरुषस्य भावः** -अस्य एकं पदं लिखत।

४) मञ्जुषातः पदानि स्वीकृत्य सम्भाषणांशान् पूरयत।

(अस्माकं, मित्रेण, आपत्कालः, बकेन, किम्, रक्षणोपायः , उपकर्त्रा)

मत्स्यराजः	-	अस्माकम् ———— समीपमागतः।
मत्स्याः	-	कथं ज्ञातं भवता?
मत्स्यराजः	-	अत्र उपस्थितेन ———— उक्तम्।
मत्स्याः	-	बकेन ———— उक्तम्?
मत्स्यराजः	-	धीवराः आगत्य अस्माकं बन्धनं करिष्यन्ति इति।
मत्स्याः	-	अस्माकं ——— कः?
मत्स्यराजः	-	बकमेव प्रार्थयामः।
मत्स्याः	-	स तु ——— शत्रुः खलु!
मत्स्यराजः	-	——अरिणा सह सन्धिः कर्तुं शक्यते।
मत्स्याः	-	एवं वा?
मत्स्यराजः	-	आम्। अपकर्त्रा —— सह सन्धिः न कार्या।
मत्स्याः	-	एवञ्चेत् तमेव आश्रयामः।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

एककम्
२

कौमुदी

आमुखम्

कौमुदी कस्य वा आनन्ददायिनी न भवति?
तथैव मानसोल्लासप्रदायकौ द्वौ अनूदितकाव्यांशौ
कौमुदी नामकेऽस्मिन्नेकके समायोजितौ।

प्रवेशकम् - युष्माकं देशे विद्यमानाः कृषिरीतीः, कार्षिकधान्यानि च अधिकृत्य चर्चां कुरुत।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

पाठः ४

देविश्रीः

एस्.के पोट्टक्काट्
(शङ्करन्कुट्टि पोट्टक्काट्)

जननम् - १९१३ मार्च १४,कोषिक्कोट्।
पितरौ - कुञ्जिरामन् पोट्टक्काट्, कुट्टूली च।
यात्राप्रदेशाः - आफ्रिक्का,अमेरिक्का, यूरोप्, पूर्वेष्या, दक्षिणएष्या ।
पुरस्काराः - केरलसाहित्यअक्कादमी पुरस्कारः(१९६२)
केन्द्रसाहित्यअक्कादमी पुरस्कारः(१९७३)
ज्ञानपीठपुरस्कारः। (१९८०)
कृतयः - ओरु देशत्तिन्टे कथा, ओरु तेरुविन्टे कथा, विषकन्यका, कुरुमुलक् (कथाः)
पातिरासूर्यन्टे नाट्टिल्, काप्पिरिकलुटे नाट्टिल्,बालिद्वीप्, सिंहभूमिः, यूरोप्पिलूटे इत्यदयः सञ्चारसाहित्यानि च।
देहान्तः - १९८२ आगस्ट् ०६

आमुखम्

सञ्चारसाहित्यं न केवलं मानसोल्लासाय अपि तु अदृष्टपूर्वासां संस्कृतीनाञ्च अवबोधाय उपकारकं भवति। तस्य प्राग्रूपं प्रायः रामायण-मेघदूत-रघुवंशादिषु संस्कृतवाङ्मयेष्वपि तत्र तत्र दृश्यते।

मलयालसञ्चारसाहित्ये एस् .के. पोट्टक्काट् महाशयः प्रातःस्मरणीय एव। एते महाशयाः कश्चिदैन्द्रजालिक इव स्वविवरणैः अस्मानपि देशदेशान्तराणि नीत्वा विचित्रविस्मयान् अनुभावयन्ति।

अस्य **बालिद्वीप्** नामकस्य ग्रन्थस्य **'अरिश्री'** अध्याये बालिदेशवासिनां तदानीन्तनं कृषिजीवनं चारुतया प्रतिपादितमस्ति। तस्यानूदितांश एवायं पाठभागः।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

एकस्मिन् प्रभाते बालिदेशस्य गिरिप्रदेशेषु सञ्चरन् तत्र तत्र दृश्यमानेन कृषिसौन्दर्येण आश्चर्यभरितोऽहम्। ग्रामे एकत्र कृषकानां मेलनं मया दृष्टम्। तस्मिन् भागं गृहीतवान्। व्रीहिमधिकृत्य तैरुक्ता कथेयम्।

"भक्ष्यरूपेण केवलं इक्षुरेवासीत् पुरा। तदा महाविष्णुः स्वयमागत्य भूमातरं व्रीहीणामुत्पादनाय नियुयोज" इति। कृषेः समृद्धेः च देवता भवति '**देविश्री**'। सा मुख्यतया व्रीहेः तण्डुलस्य चाधिदेवतारूपेण आराध्यते। अन्नभूतं धान्यम् आराधयन्तो बालिदेशवासिन इव काचन जनता कुत्रापि न दृश्यते।

ते पर्वतसानुषु कला सुभगतया '**साव**' नामकान् केदारान् निर्माय जलेन पूरयति। केदाराश्च दूरालोकने सोपानपङ्क्तिः इव विचित्ररूपेण प्रतिभान्ति। एते चन्द्रिकाचर्चिताः सावगिरयः यामिनीषु मणिसौधानि इव नितरां राजन्ते।

पौरेभ्यः कृषिस्थलं जलञ्च यथावश्यं वितरीतुं कार्षिकसहकरणपद्धतिः व्यवस्थापिता। सा पद्धतिः ''**अदात्**' इति नामके सामाजिकनीतिशास्त्रे मुख्यांशतया प्रतिपादिता। यन्त्रसाहाय्यं विना कन्दराणि कुल्याश्च निर्माय जलसेचनमपि कृतमासीत्।

'**सुबाक्**' इति कर्षकसङ्घस्य नेतृत्वे जलसेचनं, सेतुनिर्माणं, कार्षिकोत्सवाः च आयुज्यन्ते। **क्लियाङ्** नामकमध्यक्षं , **पोञ्जर्यक्कन्** इति उपाध्यक्षञ्च जनायत्तमार्गेण चिन्वन्ति। विवादांश्च कार्षिकसमितेः दायित्वे परिहरन्ति।

केरलेषु प्रचाल्यमानाः कार्षिकसमितयः इव बालिदेशेष्वपि एताः समितयः कार्षिकसंस्कृतिं परिपोषयन्ति। व्रीहिलवनोत्सवाः धान्यदेवताराधनञ्च बहुभिरनुष्ठानैः केरलेष्विव तत्राप्याघुष्यन्ते।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

पदच्छेदः

आश्चर्यभरितोऽहम्।	आश्चर्यभरितः + अहम्।
तैरुक्ता	तैः + उक्ता ।
कथेयम्।	कथा + इयम्।
इक्षुरेवासीत्	इक्षुः + एव + आसीत् ।
केदाराश्च	केदाराः+ च ।
जलञ्च	जलं + च ।
कुल्याश्च	कुल्याः + च।
उपाध्यक्षञ्च	उपाध्यक्षं + च ।
विवादांश्च	विवादान् + च।
बालिदेशेष्वपि	बालिदेशेषु +अपि।
बहुभिरनुष्ठानैः	बहुभिः +अनुष्ठानैः।
तत्राप्याघुष्यन्ते	तत्र + अपि + आघुष्यन्ते।

विग्रहः

आश्चर्यभरितः	-	आश्चर्येण भरितः।
कृषिसौन्दर्येण	-	कृषेः सौन्दर्यं कृषिसौन्दर्यम्, तेन।
पर्वतसानुषु	-	पर्वतानां सानवः पर्वतसानवः, तेषु।
कलासुभगतया	-	कलया सुभगः कलासुभगः तस्य भावः कलासुभगता। तया।
व्रीहिलवनोत्सवाः	-	व्रीहेः लवनं व्रीहिलवनं तस्य उत्सवाः।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

पठनप्रवर्तनानि ।

बालिदेशवासिनां कृषिविज्ञानसम्बन्धिनां साङ्केतिकपदानां केरलीयानां साङ्केतिकपदानुसारं पाठभागात् चित्वा लिखत।

कृषिदेवता -

गिरिकेदारः -

कृषिविज्ञानशास्त्रम् -

कर्षकसङ्घः -

कर्षकसङ्घाध्यक्षः -

उपाध्यक्षः -

पाठभागं पठित्वा बालिद्वीपनिवासिनां केरलीयानां च कृषिरीतिमधिकृत्य चर्चां कृत्वा टिप्पणीं लिखत।

श्रद्धेयाः अंशाः

भागभागित्वम्।

आशयपूर्णता।

भाषाप्रयोगः।

सूचनानुसारं पोट्टक्काट्महाशयस्य जीवनचरितं स्ववाक्यैः लिखत।

जननम्	-	१९१३ मार्च १४,कोषिक्कोट्।
पितरौ	-	कुञ्ञिरामन् पोट्टक्काट्, कुट्टूली च।
पुरस्काराः	-	केरलसाहित्यअक्कादमी पुरस्कारः ज्ञानपीठपुरस्कारः।
कृतयः	-	ओरु देशत्तिन्टे कथा, ओरु तेरुविन्टे कथा, विषकन्यका, कुरुमुलक् इत्यादयः।
देहवियोगः	-	१९८२ आगस्ट् ०६

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

स्वकृतयात्रामधिकृत्य यात्राविवरणं लिखत।

श्रद्धेयाः अंशाः

वाक्यघटना ।

आशयपूर्णता।

भाषाप्रयोगः।

उदाहरणानुसारं वाक्यानि योजयत।

उदा- सञ्चारसाहित्यं मानसोल्लासाय भवति।

तत् संस्कृतीनाम् अवबोधनाय भवति।

सञ्चारसाहित्यं **न केवलं** मानसोल्लासाय **अपि तु** संस्कृतीनाम् अवबोधनाय भवति।

क) येशुदासः गायकः भवति। सः अभिनेता भवति।

ख) सुरेशः साहित्यकारः भवति। सः चित्रकारः भवति।

ग) गणितपठनं श्रमकरं भवति। तत् सुखकरं भवति।

घ) जलं पानाय उपयुज्यते। तत् स्नानाय उपयुज्यते।

ङ) लेखनम् अक्षरज्ञानाय भवति। तत् चिन्ताविकासाय भवति।

प्रकृतिक्षोभेण कृषिनाशं संभवति। एतादृशात् प्रकृतिदुरन्तात् कृषिं संरक्षितुं प्रयोजनप्रदान् मार्गान् अधिकृत्य संगोष्ठीं प्रचालयतु।

श्रद्धेयाः अंशाः

आशयपूर्णता।

भाषाप्रयोगः।

चर्चायां भागभागित्वम् ।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

पाठः ५

माकन्दमञ्जरी

आमुखम्

संस्कृतसाहित्यं विविधैः काव्यविभागैः सम्पन्नं भवति। तथा भाषान्तरेभ्यः अनूदिताभिः कृतिभिः अपि संस्कृतभाषा सुसम्पन्ना। ईदृशेन अनुवादेन भाषयोरुभयोः शैलीभेदः अवगन्तुं शक्यते सहृदयैः। कालिदासादीनां महाकवीनां कृतयः वर्षेभ्यः पूर्वमेव केरलकालिदासादिभिः कैरल्या अनूदिताः। तथैव कुमारनाशान्, उल्लूर् प्रभृतीनां महाकवीनाम् अन्येषाञ्च रचनाः गैर्वाण्या च अनूदिताः। इदानीमपि वृत्तानुवृत्तं, पदानुपदं, आशयानुसारं च संस्कृतभाषायाः इतरभाषासु तथा इतराभ्यः संस्कृतभाषायाञ्च भाषान्तरीकरणं प्रचलदस्ति।

श्रीमतः वैलोप्पिल्लि श्रीधरमेनोन् महाभागस्य **माम्पष़म्** नामिका कविता कैरल्यां प्रथितास्ति। मातृवात्सल्यस्य अनुत्तमोदाहरणत्वेन प्रथितायाः केकानामभाषावृत्तनिबद्धायाः अस्याः कवितायाः स्वतन्त्राशयानुवाद एव **माकन्दमञ्जरी**। श्रीमता हरिप्रसाद् कटम्पूर् महाभागेन अनूदितायाः कवितायाः काश्चन पङ्क्तयः अत्र समाकलिताः।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

अङ्गणस्थितादाम्रात् प्रथमे फले च्युते
मातुरक्षिभ्यां क्षणादपतत्तप्तोदकम् ।। १

पदच्छेदः

अङ्गणस्थितादाम्रात् - अङ्गणस्थितात् + आम्रात् ।
क्षणादपतत्तप्तोदकम् - क्षणात् + अपतत् + तप्तोदकम्।

विग्रहः

अङ्गणस्थितात् - अङ्गणे स्थितः अङ्गणस्थितः, तस्मात्।

अन्वयः	*अन्वयार्थः*
अङ्गणस्थितात्	चत्वरस्थितात्
आम्रात्	आम्रवृक्षात्
प्रथमे फले च्युते	आद्यफले पतिते
मातुः	अम्बायाः
अक्षिभ्याम्	नेत्राभ्याम्
क्षणात्	झटित्येव
तप्तोदकम्	तप्ताश्रु
अपतत् ।	पतति स्म।

आशयः

गृहाङ्गणस्थाद् आम्रवृक्षात् यदा प्रथमतया पक्वफलमपतत् तस्मिन्नेव काले मातुः नयनाभ्यां तप्ताश्रूणि अपतन् ।

कोशः

अङ्गणम् - अङ्गणं चत्वराजिरे।
आम्रः - आम्रश्चूतो रसालोऽसौ सहकारोऽतिसौरभः।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

पूर्वं चतुर्मासेभ्यो लिप्सया प्रतीक्षिते

बालमाकन्दे सुमप्रसवे प्रवर्तिते ।। २

वत्सलात्मजो मातुः कुतुकादेकं चूत-

स्तबकं धृत्वाह्लादादन्तिकं सम्प्राप्तवान् ।। ३

पदच्छेदः

चतुर्मासेभ्यो लिप्सया	-	चतुर्मासेभ्यः + लिप्सया।
कुतुकादेकम्	-	कुतुकात् + एकम्।
धृत्वाह्लादादन्तिकम्	-	धृत्वा + आह्लादात् + अन्तिकम् ।

विग्रहः

बालमाकन्दे	-	बालश्च असौ माकन्दश्च, तस्मिन्।
सुमप्रसवे	-	सुमस्य प्रसवः, तस्मिन्।
लिप्सया	-	लब्धुम् इच्छा लिप्सा, तया।

अन्वयः		***अन्वयार्थः***
चतुर्मासेभ्यः पूर्वम्	-	चतुर्भ्यः मासेभ्यः प्राक्
लिप्सया	-	लब्धुमिच्छया
प्रतीक्षिते	-	आकाङ्क्षापूर्वं निरीक्षिते,
बालमाकन्दे	-	आम्रवृक्षके,(अस्मात् आम्रमञ्जरीमवचिनोतुं शिशोरपि साध्यम् इति द्योतनाय बालः इति विशेषणम्)
सुमप्रसवे	-	कुसुमोद्गमे
प्रवर्तिते	-	प्रचलिते (सति)
मातुः	-	अम्बायाः
वत्सलात्मजः	-	प्रियपुत्रः

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

कुतुकात्	-	कौतुकात्
एकं चूतस्तबकम्	-	एकां चूतमञ्जरीम्
धृत्वा	-	प्रभज्य (धारयन् इति यावत्)
आह्लादात्	-	सन्तोषात्
अन्तिकम्	-	(अम्बायाः) समीपम्
सम्प्राप्तवान् ।	-	समागतवान्।

आशयः

चतुर्भ्यः मासेभ्यः पूर्वम् आम्रवृक्षे कुसुमोद्भवोऽभवत्। तदानीं मातुः प्रियपुत्रः बालोचितेन कौतुकेन तेभ्यश्चूताङ्कुरेभ्यः स्तबकमेकं प्रभज्य तस्याः समीपं सामोदमागतवान्।

रुषया मातावदत् - प्रफुल्लं गुच्छं शिशो!
लीलया त्वया खल! भञ्जितं कष्टं कष्टम्।। ४
पतिते चूते क्षणात् स्वीकर्तुं योग्यो भवान्
मञ्जरीं लुनात्यहो! ताडनव्यथाभावात् ।। ५



पदच्छेदः

मातावदत् - माता + अवदत् ।
लुनात्यहो - लुनाति + अहो ।

विग्रहवाक्यः

ताडनव्यथाभावात् - ताडनस्य व्यथा, तस्याः अभावः, तस्मात्।

अन्वयः		*अन्वयार्थः*
माता	-	अम्बा
रुषया	-	रोषेण
अवदत्	-	अकथयत्

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

खल ! शिशो !	-	हे दुर्विनीत बालक !
प्रफुल्लं	-	विकसितम्
गुच्छम्	-	पुष्पस्तबकम्
त्वया लीलया	-	त्वया क्रीडया
भञ्जितम्	-	विनाशितम् (अवमर्दितम् इति यावत्)
कष्टं कष्टम्	-	एतत् खेदकरमेव।
चूते	-	आम्रफले
पतिते	-	गलिते (सति)
क्षणात्	-	तदैव
स्वीकर्तुं	-	समाहर्तुं,
योग्यः	-	भवान् समर्थः
ताडनव्यथाभावात्	-	दण्डनवेदनाभावात्
मञ्जरीम्	-	पुष्पस्तबकम्
लुनाति।	-	अवचिनोति।।५।।

आशयः

तद्दृष्ट्वा माता रोषेणावदत् , हे दुर्विनीत ! विकसितां चूतमञ्जरीं त्वमवचिनोषि। एतद् कष्टमेव । त्वं ताडनव्यथां न जानासि। पक्वमाम्रफलं पतनावसरे एव स्वीकर्तुं योग्यः त्वमेव आम्रमञ्जरीम् अवचिनोषि।

कोशः

मञ्जरी - वल्लरिर्मञ्जरिस्त्रियाम्। स्याद् गुच्छकस्तु स्तबकः।

मातुराक्षेपं श्रुत्वा पुत्रस्य मुखाम्भोजं

निष्कलं तप्ताश्रुभिर्वैवर्ण्यमाप्तं क्षणात्।। ६

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

पदच्छेदः

तप्ताश्रुभिर्वैवर्ण्यम् - तप्ताश्रुभिः + वैवर्ण्यम्।

विग्रहः

मुखाम्भोजम् - मुखम् एव अम्भोजम्।

अन्वयः		*अन्वयार्थः*
मातुः	-	अम्बायाः
आक्षेपम्	-	निन्दाम्
श्रुत्वा	-	निशम्य
पुत्रस्य	-	आत्मजस्य
निष्कलं	-	कलङ्करहितम्
मुखाम्भोजम्	-	मुखकमलम्
तप्ताश्रुभिः	-	दुःखबाष्पैः
क्षणात्	-	सत्वरम्
वैवर्ण्यम्	-	विवर्णभावम्
आप्तम्।	-	प्राप्तम्।

आशयः -

अम्बायाः रोषवचनं श्रुत्वा पुत्रस्य निर्मलं मुखं तत्क्षणमेव दुःखाश्रुभिः विवर्णतां प्रपेदे।।६।।

कोशः

आक्षेपः - अवर्णाक्षेपनिर्वादपरिवादापवादवत्।

माकन्दं समाहर्तुं नागमिष्यामीत्युक्त्वा

स्तबकं पुत्रोऽक्षिपत् सुन्दरं भूमौ शुचा ।। ७

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

पदच्छेदः

नागमिष्यामीत्युक्त्वा	-	न + आगमिष्यामि + इति + उक्त्वा।
पुत्रोऽक्षिपत्	-	पुत्रः + अक्षिपत्।

अन्वयः		*अन्वयार्थः*
माकन्दम्	-	आम्रफलम्
समाहर्तुम्	-	स्वीकर्तुम्
न आगमिष्यामि	-	अहं न अभ्यागमिष्यामि,
इति उक्त्वा	-	इति उदीर्य
पुत्रः	-	तनयः
सुन्दरम्	-	मनोहरम्
स्तबकम्	-	कुसुममञ्जरीम्
शुचा	-	दुःखेन
भूमौ	-	भूतले
अक्षिपत् ।	-	क्षिपति स्म।

आशयः-

अहमाम्रफलं स्वीकर्तुं नागमिष्यामि इति दुःखेन उक्त्वा पुत्रः सुन्दरं तत्स्तबकं भूमौ अभ्यक्षिपत्।

भाषणं यथायोग्यं कर्तुमज्ञाताः बालाः
दीर्घद्रष्टारो यूयं समर्थाः दैवज्ञास्ते।।८।।

पदच्छेदः

दैवज्ञास्ते	-	दैवज्ञाः + ते।
दीर्घद्रष्टारो यूयं	-	दीर्घद्रष्टारः + यूयम् ।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

अन्वयः		*अन्वयार्थः*
बालाः !	-	हे बालकाः !
यथायोग्यम्	-	योग्यतां अनुसृत्य
भाषणम्	-	सम्भाषणम्
कर्तुम्	-	प्रयोक्तुम्
अज्ञाताः	-	असमर्थाः
ते यूयं	-	तादृशाः यूयं
दीर्घद्रष्टारः	-	दीर्घदर्शिनः
समर्थाः	-	परिचयसम्पन्नाः
दैवज्ञाः ।	-	ज्यौतिषिकाः (स्थ)।

आशयः

हे बालाः ! सम्यक् रीत्या सम्भाषणं कर्तुमसमर्थाः भवन्तः, भाविं प्रवक्तुम् अतिसमर्थाः भवन्ति। (लीलया कृतं शिशूनां वचनमपि कदाचित् सम्यक् फलति इति कविहृदयः)

ग्रीष्ममार्ताण्डांशुभिर्माकन्दे मरकतं
काञ्चनसौगन्धिकं समभूत्तस्मात्पूर्वम्।। ९
माकन्दं समाहर्तुं नोत्सुको भूत्वा मातु-
रर्भकः पुँस्कोकिलोऽप्यगच्छत्सुरलोकम् ।। १०

पदच्छेदः

नोत्सुको भूत्वा	-	न + उत्सुकः + भूत्वा।
ग्रीष्ममार्ताण्डांशुभिर्माकन्दे	-	ग्रीष्ममार्ताण्डांशुभिः + माकन्दे ।
समभूत्तस्मात्पूर्वम्	-	समभूत् + तस्मात् + पूर्वम्।
मातुरर्भकः	-	मातुः + अर्भकः।
पुँस्कोकिलोऽप्यगच्छत्	-	पुँस्कोकिलः + अपि + अगच्छत्।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

विग्रहः

ग्रीष्ममार्ताण्डांशुभिः	-	ग्रीष्मे मार्ताण्डः,तस्य अंशुः, तैः।
काञ्चनसौगन्धिकम्	-	काञ्चनं च तत् सौगन्धिकम् च।
पुँस्कोकिलः	-	पुमान् च असौ कोकिलः च।

अन्वयः		अन्वयार्थः
ग्रीष्ममार्ताण्डांशुभिः	-	निदाघकालसूर्यकिरणैः
माकन्दे	-	आम्रवृक्षे
मरकतं	-	मरतकवर्णम् आम्रफलम्, (यथा)
काञ्चनसौगन्धिकं	-	स्वर्णवर्णं तथा सुगन्धसमेतं च (फलम्)
समभूत् ।	-	(परिणामम्)अवाप्नुयात्।
तस्मात् पूर्वम्	-	तस्मात् कालात् पूर्वम्।
मातुः	-	अम्बायाः
अर्भकः	-	शिशुः
पुँस्कोकिलः	-	पुमान् कोकिलः
माकन्दम्	-	आम्रफलम्
समाहर्तुम्	-	स्वीकर्तुम्
न उत्सुकः भूत्वा	-	अनिच्छन्
सुरलोकम्	-	स्वर्लोकम् (दिवम् इति यावत्)
अगच्छत्।	-	अगात्।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

आशयः

अथ ग्रीष्मकालसूर्यकिरणैः प्रदीप्तं (परिपक्वम्) आम्रफलं मरतकवर्णं परित्यज्य स्वर्णवर्णं सुगन्धपूर्णञ्चाभवत्। किन्तु तस्मात् कालात् पूर्वं मातुः प्राणप्रियः पुत्रः, पुँस्कोकिलः इव आम्रफलं समाहर्तुम् अनिच्छन् दिवमगच्छत्।। (पुँस्कोकिलः चूतस्य सुमप्रसवसमय एव तस्मिन् तत्परो भवति, न तु चूतफलास्वादने। तदिव अयमर्भकोऽपि तस्मिन् विमुखोऽभूदित्याशयः)

अमरप्रियोऽपि स ज्ञातिषु विमुखस्सन्
सन्ततं क्रीडालोलो विहरत्यस्मिन् काले ।। ११

पदच्छेदः

अमरप्रियोऽपि	-	अमरप्रियः + अपि ।
विमुखस्सन्	-	विमुखः + सन्।
क्रीडालोलो विहरत्यस्मिन्	-	क्रीडालोलः + विहरति + अस्मिन् ।

विग्रहः

अमरप्रियः	-	अमराणां प्रियः।
लोकान्तरम्	-	अन्यः लोकः ।

अन्वयः		*अन्वयार्थः*
अमरप्रियः अपि	-	देवानां वात्सल्यपात्रम् अपि (अपि इति सम्भावनार्थे)
सः	-	अयं बालकः
ज्ञातिषु	-	बन्धुजनेषु
विमुखः	-	पराङ्मुखः (उदासीन इति यावत्)
सन्ततं	-	निरन्तरं
क्रीडालोलः सन्	-	केलीतत्परः सन्
विहरति ।	-	(यदा) क्रीडति।
अस्मिन् काले	-	एतत्काले

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

आशयः -

दिवं गतः अयं बालकः देवानां प्रियङ्करो भूत्वा बान्धवेषु उदासीनस्सन् क्रीडातात्पर्येण अत्र व्यहरत् । तस्मिन्नेव काले गृहाङ्गणस्थाद् आम्रवृक्षात् प्रथमपतितं पक्वमाम्रफलं वीक्षितवत्याः मातुः नयनाभ्यां तप्ताश्रूणि अपतन्।

कोशः

दैवज्ञः - ज्यौतिषिको दैवज्ञगणकावपि।

पठनप्रवर्तनानि।

कवितां सतालम् आलपतु।

श्रद्धेयाः अंशाः

उचितः तालः । भावात्मकता। उच्चारणशुद्धिः।

पाठभागाद् इष्टतमाः पङ्क्तीः चित्वा आस्वादनटिप्पणीं लिखतु।

श्रद्धेयाः अंशाः

इष्टस्य कारणम्। उचितभाषाप्रयोगः। आशयपूर्णता।

अङ्गणस्थितादाम्रात् प्रथमे फले च्युते मातुरक्षिभ्यां तप्तोदकम् अपतत्। वाक्यमिदं यदा...तदा उपयुज्य परिवर्तयतु। समानप्रयोगान् चित्वा लिखतु।

श्रद्धेयाः अंशाः

प्रयोगसादृश्यम्। उचितलकारप्रयोगः। आशयपूर्णता।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

कैरलीतः संस्कृतभाषया अनूदितानां कृतीनां तेषां कर्तॄणां च पट्टिकां करोतु।

श्रद्धेयाः अंशौ

औचित्यम्। कालक्रमः ।

कवितायाः आशयं कथारूपेण परिवर्त्य लिखतु।

श्रद्धेयाः अंशाः

उचितभाषाप्रयोगः। आशयपूर्णता। कथाघटना।

विशेषः

अङ्गणस्थितादाम्रात् प्रथमे फले च्युते मातुरक्षिभ्यां तप्तोदकम् अपतत् इति वाक्ये प्रथमे फले च्युते इति पदत्रयं सप्तमीविभक्ति रूपं भवति। (यस्य च भावेन भावलक्षणम्- अष्टाध्यायी-२- ३- ३७)

आम्रम् - आम्रस्य फलम्। द्विहिनं प्रसवे सर्वम् इति नियमेन. क्लीबत्वम्। फले लुक् (४- ३- १६३) इति लुक्। एवं माकन्दम् ,चूतम् इत्यत्रापि द्रष्टव्यम्।

- **रुषया** - रुषा इत्याकारान्तशब्दस्य तृतीयैकवचनं रूपम्।
  क्रोधो भामः क्रुधा रुषा -इति शब्दार्णवः। भागुरिमतेन रुट् शब्दस्य टाप् योगेन आकारान्तत्वम्। तदुक्तम्-
  वष्टि भागुरिरल्लोपं अवाप्योरुपसर्गयोः।
  आपञ्चैव हलन्तानां यथा वाचा निशा दिशा।। -इति। एवम्-
  निट् -**निशा** , रुट् -**रुषा**, दिक् -**दिशा**, वाक् -**वाचा** इति आकारान्तरूपमपि साधुः।।
- **आम्रम् -** आम्रस्य फलम्। **द्विहीनं प्रसवे सर्वम्** इति नियमेन क्लीबत्वम्।
  फले लुक् (4–3-163) इति लुक। एवं माकन्दम्, चूतम् इत्यत्रापि द्रष्टव्यम्।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

शब्दकोशः ।

संस्कृतम्	संस्कृतम्	कैरली	कन्नटम्	आङ्गलेयम्
अङ्कणम्	चत्वरम्	മുറ്റം	ಅಂಗಳ	Court yard
अनूदितम्	भाषान्तरीकृतम्	വിവർത്തനം	ಭಾಷಾಂತರಗೊಳಿಸುದು	Translated
आराधयन्तः	प्रार्थयन्तः	ആരാധിക്കുന്ന	ಆರಾಧಿಸುವ	Worshipping
आम्रम्	आम्रफलम्	മാങ്ങ	ಮಾವಿನಹಣ್ಣು	Mango
इक्षुः	रसालः	കരിമ്പ്	ಕಬ್ಬು	Shuger cane
कथा	उदन्तम्	കഥാ	ಕಥೆ	Tale
केदारः	क्षेत्रम्	വയൽ	ಗದ್ದೆ	Paddy field
गृहीतः	स्वीकृतः	സ്വീകരിച്ചത്	ಸ್ವೀಕರಿಸಿದ	Being recieved
तण्डुलः	ओदनः	അരി	ಅಕ್ಕಿ	Rice
निर्माय	निर्माणं कृत्वा	നിർമിച്ചിട്ട്	ನಿರ್ಮಿಸಿ	Having made
प्रतिपादितः	उक्तः	പറഞ്ഞത്	ಹೇಳಿದ	Being told
चूतस्तबकम्	चूतगुच्छम्	മാങ്കുല	ಮಾವಿನಹೂ	Bunch of mango flower
तप्तोदकम्	तप्तनयनाश्रुः	ചുടുകണ്ണീർ	ದುಃಖದಕಣ್ಣೀರು	Hot eye drop
प्रफुल्लं	विकसितम्	വികസിച്ചത്	ವಿಕಾಸಹೊಂದಿದ	Blossamed
भञ्जितम्	शिथिलितं	ഒടിക്കപ്പെട്ടത്	ತುಂಡಾದ	Being broken
भाषितम्	उक्तम्	പറയപ്പെട്ടത്	ಹೇಳಲ್ಪಟದು	Being spoken
मुखाम्भोजम्	मुखकमलम्	താമരപോലുള്ള മുഖം	ತಾವರೆಯಂತಿರುವ ಮುಖ	Face like Lotus
यथावश्यम्	आवश्यानुसारम्	ആവശ്യമനുസരിച്ച്	ಆವಶ್ಯಾನುಸಾರ	As per need
यामिनीषु	रात्रिषु	രാത്രികളിൽ	ರಾತ್ರಿಗಳಲ್ಲಿ	During nights
रुषा	कोपेन	കോപം	ಕೋಪ	By anger
वितरीतुम्	दातुम्	നൽകുന്നതിന്	ಕೊಡಲು	To give
व्रीहिः	आशुः (पाटलः)	നെല്ല്	ಬತ್ತ	Rice
समाहर्तुम्	सम्पादयितुम्	സ്വീകരിക്കുവാൻ	ಸ್ವೀಕರಿಸಲು	To collect
सञ्चरन्	विचरन्	സഞ്ചരിക്കുന്നവൻ	ಸಂಚರಿಸುವವನು	Traveller
समृद्धिः	ऋद्धिः(विधा)	സമൃദ്ധി	ಸಮೃದ್ಧಿ	Abundance
सोपानपङ्क्तिः	आरोहणश्रेणिः	ഏണിപ്പടി	ನಿಚ್ಚಣಿಗೆ	Stair case
सौधानि	गृहाणि	വീടുകൾ	ಮನೆಗಳು	Mansions
सुमप्रसवे	कुसुमप्रसूते	പൂവിടരൽ	ಹೂಗಳು ಅರಳುವುದ	In the blossoming

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

किमधिगतम्?

निर्देशः - प्रवर्तनानि यथाकालं कृतानि चेत् साधुसूचकचिह्नं (√) क्रियताम्

क्रम संख्या	प्रवर्तनानि	सम्यक् कृतम्	भागिकतया कृतम्	क्लेशनिर्देशः	परिहारबोधनम् (संख्यया सूचितम्)
१					
२					
३					
४					
५					
६					

१ अध्यापकस्य साहाय्येन । २ सुहृदः साहाय्येन। ३ अन्येषां साहाय्येन।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

अभ्यासपत्रिका-२

१. कोष्ठकात् उचितमुत्तरं चित्वा लिखत।

क) देविश्री इति पाठभागः कस्मात् ग्रन्थात् स्वीकृतः?

(सिंहभूमिः, बालिद्वीप्, कुरुमुलक्)

ख) माकन्दमञ्जरी कस्याः कवितायाः अनूदितांशः भवति?

(नलिनी,प्रेमसङ्गीतम्, माम्पषम्)

२. पट्टिकां पूरयत ।

कविः	कृतयः	विभागः
एस्.के .पोट्टक्काट्	बालिद्वीप्	————
————	माम्पषम्	कविता
वाल्मीकिः	———	इतिहासकाव्यम्।

३. अधोदत्तस्य कवितांशस्य आस्वादनटीकां लिखत।

भाषणं यथायोग्यं कर्तुमज्ञाताः बालाः।

दीर्घद्रष्टारो यूयं समर्थाः दैवज्ञास्ते।।

४. उदाहरणानुसारं वाक्यं परिवर्तयत।

उदा - चूतः पतितः । भवान् स्वीकर्तुं योग्यः ।

चूते पतिते सति भवान् स्वीकर्तुं योग्यः।

क) आम्रं च्युतम्। मातुः अक्षिभ्याम् अश्रुः अपतत्।

....।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

५. सूचनानुसारं विवरणं लिखत।

केरलस्य राजधानिः .... पद्मनाभस्वामीमन्दिरम् .... मेत्तन्मणि .... जन्तुशाला ....पुरावस्तुसंग्रहालयः .... शङ्खुमुखम्.......... कोवलंसमुद्रतटः।

६. उदाहरणानुसारं पदच्छेदं कुरुत।

उदा - विवादांश्च - विवादान् + च।

पुरुषांश्च - ———— + ——— ।

७. उदाहरणानुसारं विग्रहवाक्यं लिखत ।

उदा - बालमाकन्दे - बालश्च असौ माकन्दश्च बालमाकन्दः , तस्मिन्।

सुन्दरपुरुषे - ————————————।

८. अधोदत्तवाक्यात् क्त्वान्त ल्यबन्त, तुमुन्नन्तपदानि विविच्य लिखत ।

सुमेशः नगरं गत्वा मित्रैः सम्मिल्य समुद्रतटं गन्तुं इच्छति।

९. विवर्तकानां ग्रन्थानां नामानि च यथोचितं योजयत।

अभिज्ञानशाकुन्तलम्	-	कुञ्जिक्कुट्टन् तम्पुरान्।
वाल्मीकिरामायणम्	-	वेण्णिक्कुलं गोपालक्कुरुप्प्।
महाभारतम्	-	एन्.गोपालप्पिल्ला।
रामचरितमानसम्	-	वल्लत्तोल् नारायणमेनोन्।
चिन्ताविष्टयाय सीता	-	केरलवर्मा वलियकोयित्तम्पुरान्।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

ഭാരതത്തിന്റെ ഭരണഘടന

ഭാഗം IV ക

മൗലിക കർത്തവ്യങ്ങൾ

51 ക. മൗലിക കർത്തവ്യങ്ങൾ - താഴെപ്പറയുന്നവ ഭാരതത്തിലെ ഓരോ പൗരന്റെയും കർത്തവ്യം ആയിരിക്കുന്നതാണ്:

(ക) ഭരണഘടനയെ അനുസരിക്കുകയും അതിന്റെ ആദർശങ്ങളെയും സ്ഥാപനങ്ങളെയും ദേശീയപതാകയെയും ദേശീയഗാനത്തെയും ആദരിക്കുകയും ചെയ്യുക;

(ഖ) സ്വാതന്ത്ര്യത്തിനുവേണ്ടിയുള്ള നമ്മുടെ ദേശീയസമരത്തിന് പ്രചോദനം നൽകിയ മഹനീയാദർശങ്ങളെ പരിപോഷിപ്പിക്കുകയും പിൻതുടരുകയും ചെയ്യുക;

(ഗ) ഭാരതത്തിന്റെ പരമാധികാരവും ഐക്യവും അഖണ്ഡതയും നിലനിർത്തുകയും സംരക്ഷിക്കുകയും ചെയ്യുക;

(ഘ) രാജ്യത്തെ കാത്തുസൂക്ഷിക്കുകയും ദേശീയ സേവനം അനുഷ്ഠിക്കുവാൻ ആവശ്യപ്പെടുമ്പോൾ അനുഷ്ഠിക്കുകയും ചെയ്യുക;

(ങ) മതപരവും ഭാഷാപരവും പ്രാദേശികവും വിഭാഗീയവുമായ വൈവിധ്യങ്ങൾക്കതീതമായി ഭാരതത്തിലെ എല്ലാ ജനങ്ങൾക്കുമിടയിൽ, സൗഹാർദവും പൊതുവായ സാഹോദര്യമനോഭാവവും പുലർത്തുക. സ്ത്രീകളുടെ അന്തസ്സിന് കുറവു വരുത്തുന്ന ആചാരങ്ങൾ പരിത്യജിക്കുക;

(ച) നമ്മുടെ സംസ്കാരസമന്വയത്തിന്റെ സമ്പന്നമായ പാരമ്പര്യത്തെ വിലമതിക്കുകയും നിലനിറുത്തുകയും ചെയ്യുക;

(ഛ) വനങ്ങളും തടാകങ്ങളും നദികളും വന്യജീവികളും ഉൾപ്പെടുന്ന പ്രകൃത്യാ ഉള്ള പരിസ്ഥിതി സംരക്ഷിക്കുകയും അഭിവൃദ്ധിപ്പെടുത്തുകയും ജീവികളോട് കാരുണ്യം കാണിക്കുകയും ചെയ്യുക;

(ജ) ശാസ്ത്രീയമായ കാഴ്ചപ്പാടും മാനവികതയും, അന്വേഷണത്തിനും പരിഷ്കരണത്തിനും ഉള്ള മനോഭാവവും വികസിപ്പിക്കുക;

(ഝ) പൊതുസ്വത്ത് പരിരക്ഷിക്കുകയും ശപഥം ചെയ്ത് അക്രമം ഉപേക്ഷിക്കുകയും ചെയ്യുക;

(ഞ) രാഷ്ട്രം യത്നത്തിന്റെയും ലക്ഷ്യപ്രാപ്തിയുടെയും ഉന്നതതലങ്ങളിലേക്ക് നിരന്തരം ഉയരത്തക്കവണ്ണം വ്യക്തിപരവും കൂട്ടായതുമായ പ്രവർത്തനത്തിന്റെ എല്ലാ മണ്ഡലങ്ങളിലും ഉൽകൃഷ്ടതയ്ക്കുവേണ്ടി അധ്വാനിക്കുക.

(ട) ആറിനും പതിനാലിനും ഇടയ്ക്ക് പ്രായമുള്ള തന്റെ കുട്ടിക്കോ തന്റെ സംരക്ഷണയിലുള്ള കുട്ടികൾക്കോ, അതതു സംഗതി പോലെ, മാതാപിതാക്കളോ രക്ഷാകർത്താവോ വിദ്യാഭ്യാസത്തിനുള്ള അവസരങ്ങൾ ഏർപ്പെടുത്തുക.

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

കുട്ടികളുടെ അവകാശങ്ങൾ

പ്രിയമുള്ള കുട്ടികളേ,

നിങ്ങൾക്കുള്ള അവകാശങ്ങളെന്തെല്ലാമെന്ന് അറിയേണ്ടതില്ലേ? അവകാശങ്ങളെക്കുറിച്ചുള്ള അറിവ് നിങ്ങളുടെ പങ്കാളിത്തം, സംരക്ഷണം, സാമൂഹ്യനീതി എന്നിവ ഉറപ്പാക്കാൻ പ്രേരണയും പ്രചോദനവും നൽകും. നിങ്ങളുടെ അവകാശങ്ങൾ സംരക്ഷിക്കാൻ ഇപ്പോൾ ഒരു കമ്മിഷൻ പ്രവർത്തിക്കുന്നുണ്ട്. കേരള സംസ്ഥാന ബാലാവകാശസംരക്ഷണ കമ്മീഷൻ എന്നാണ് അതിന്റെ പേര്. എന്തെല്ലാമാണ് നിങ്ങൾക്കുള്ള അവകാശങ്ങൾ എന്നു നോക്കാം.

- സംസാരത്തിനും ആശയപ്രകടനത്തിനുമുള്ള സ്വാതന്ത്ര്യം
- ജീവന്റെയും വ്യക്തിസ്വാതന്ത്ര്യത്തിന്റെയും സംരക്ഷണം
- അതിജീവനത്തിനും പൂർണവികാസത്തിനുമുള്ള അവകാശം
- ജാതി-മത-വർഗ-വർണ ചിന്തകൾക്കതീതമായി ബഹുമാനിക്കപ്പെടാനും അംഗീകരിക്കപ്പെടാനുമുള്ള അവകാശം
- മാനസികവും ശാരീരികവും ലൈംഗികവുമായ പീഡനങ്ങളിൽ നിന്നുള്ള സംരക്ഷണത്തിനും പരിചരണത്തിനുമുള്ള അവകാശം
- പങ്കാളിത്തത്തിനുള്ള അവകാശം
- ബാലവേലയിൽനിന്നും ആപത്കരമായ ജോലികളിൽ നിന്നുമുള്ള മോചനം
- ശൈശവവിവാഹത്തിൽനിന്നുള്ള സംരക്ഷണം
- സ്വന്തം സംസ്കാരം അറിയുന്നതിനും അതനുസരിച്ച് ജീവിക്കുന്നതിനുമുള്ള സ്വാതന്ത്ര്യം
- അവഗണനകളിൽ നിന്നുള്ള സംരക്ഷണം
- സൗജന്യവും നിർബന്ധിതവുമായ വിദ്യാഭ്യാസ അവകാശം
- കളിക്കാനും പഠിക്കാനുമുള്ള അവകാശം
- സ്നേഹവും സുരക്ഷയും നൽകുന്ന കുടുംബവും സമൂഹവും ലഭ്യമാകാനുള്ള അവകാശം

നിങ്ങളുടെ ചില ഉത്തരവാദിത്വങ്ങൾ

- സ്കൂൾ, പൊതുസംവിധാനങ്ങൾ എന്നിവ നശിപ്പിക്കാതെ സംരക്ഷിക്കുക.
- സ്കൂളിലും പഠനപ്രവർത്തനങ്ങളിലും കൃത്യനിഷ്ഠ പാലിക്കുക.
- സ്കൂൾ അധികാരികളെയും അധ്യാപകരെയും മാതാപിതാക്കളെയും സഹപാഠികളെയും ബഹുമാനിക്കുകയും അംഗീകരിക്കുകയും ചെയ്യുക.
- ജാതി-മത-വർഗ-വർണ ചിന്തകൾക്കതീതമായി മറ്റുള്ളവരെ ബഹുമാനിക്കാനും അംഗീകരിക്കാനും സന്നദ്ധരാവുക.

ബന്ധപ്പെടേണ്ട വിലാസം:

കേരള സംസ്ഥാന ബാലാവകാശസംരക്ഷണ കമ്മീഷൻ

'ശ്രീ ഗണേഷ്', റ്റി.സി. 14/2036, വാൻറോസ് ജംഗ്ഷൻ,

കേരള യൂണിവേഴ്സിറ്റി പി.ഒ, തിരുവനന്തപുരം-34, ഫോൺ: 0471-2326603

ഇ-മെയിൽ: childrights.cpcr@kerala.gov.in, rte.cpcr@kerala.gov.in

വെബ്സൈറ്റ്: www.kescpcr.kerala.gov.in

ചൈൽഡ് ഹെൽപ്പ്ലൈൻ – 1098, ക്രൈം സ്റ്റോപ്പർ – 1090, നിർഭയ – 1800 425 1400

കേരള പോലീസ് ഹെൽപ്പ് ലൈൻ – 0471 - 3243000/44000/45000

*online **R.T.E Monitoring: www.nireekshana.org.in***

Downloaded from https:// www.studiestoday.com